CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

5-D-P-13.

Coll. No. 650

Title Nyaya Muktavali.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 650. Subject: Nyāya.

Title: Nyāya Muktāvalī.

Author: — Scribe: Vāmana pāthaka.

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.1" by 3.5" Extent: 67 foll.

Language: Sanskrit. Script: Devanāgari.

Remarks: —

पाठकवामनभट्टस्यपुस्तकमिदंन्यायमुक्तावली ७००

॥१॥ श्रीगणेशायनमः ॥श्रीविश्वेश्वरायनमः॥ चूडामणीकृतविधुर्वलयीकृतवासुकिः॥ भवोभवतुभव्यायलीलातांडव
पंडितः॥१॥ निजानिर्मितकारिकावलीमतिसंक्षिप्तचिरंतनोक्तिभिः॥ विशदीकरवाणि कौतुकान्ननुराजीव
दयावशंवदः॥२॥ सद्द्रव्यागुणगुंफितासुकृतिनांसत्कर्मणाज्ञापिकासत्सामान्यविशेषनित्यामिलिताभा
वप्रकर्षोज्वला। विष्णोर्वक्षसिविश्वनाथकृतिनासिद्धांतमुक्तावलीविन्यस्तामनसोमुदंवितनुतांसद्यु
क्तिरेषाचिरं ॥३॥ विघ्नविघातायकृतंमंगलंशिष्यशिक्षायैनिबध्नाति। ननुतेसादिं नतुमंगलं न ना॰ १
विघ्नध्वंसंप्रतिनवासमाप्तिंप्रतिकारणंविनापिमंगलंनास्तिकादीनांग्रंथेनिर्विघ्नपरिसमाप्तिदर्शना ॥१॥
दितिचेन्न। अविगीतशिष्टाचारविषयत्वेनमंगलस्यसफलत्वेसिद्धेतत्रचफलजिज्ञासायांसंभव

अ१
त्वदृष्टफलकत्वे अदृष्टकल्पनायान्याय्यत्वादुपस्थितत्वात्समाप्तिरेवफलंकल्प्यते। इत्थंचयत्रमंगलंनदृश्य
ते तत्रापिजन्मांतरीयंतत्कल्प्यते यत्रचसत्यपिमंगलेसमाप्तिर्नदृश्यतेतत्रबलवत्तरविघ्नोविघ्नप्राचुर्यंवाबोध्यं
२ प्रचुरस्यास्यैवबलवत्तरविघ्ननिवारणेकारणत्वंबोध्यंविघ्नध्वंसस्तुमंगलस्यद्वारमित्याहुः॥ नव्यास्तुमंगलस्य
विघ्नध्वंसएवफलंसमाप्तिस्तुबुद्धिप्रतिभादिकारणकलापात् नचस्यातःसिद्धविघ्नविरहवताकृतस्यमंगल
स्यानिष्फलत्वापत्तिरितिवाच्यं इष्टापत्तेः। विघ्नशंकयातदाचरणात् तथैवशिष्टाचारात् नचतस्यनिष्फल
त्वेतद्बोधकवेदाप्रामाण्यंसतिविघ्नेतन्नाशस्यैववेदबोधितत्वात्। अतएवपापभ्रमेणकृतप्रायश्चित्तस्यनि

॥२॥ तद्बोधक १ ५ नेश्वरासिद्धिः नच शरीराजन्यत्वेन कर्तृजन्यत्वसाधके नयस्वत्तिपक्षवृत्तित्वाभावं अप्रयोजकत्वात् सकर्तृकत्वेन ५ उ
फलत्वेपि न विघ्नप्रामाण्यं मंगलंच विघ्नध्वंसविशेषकारणं विघ्नध्वंसविशेषेच विनायकस्तवपाठादि कश्चिद्वि
घ्नात्यंताभावएवसमाप्तिसाधनं प्रतिबंधकसंसर्गाभावस्यैव कार्यजनकत्वात् इत्थंच नास्तिकादिग्रंथेषु जन्मांत कृत २
रीयमंगलजन्यदुरितध्वंसः स्वतःसिद्धविघ्नात्यंताभावोवा अस्तीति नव्यभिचारइत्याहुः । संसारेति संसारए
वमहीरुहो वृक्षस्तस्य बीजाय एतेन ईश्वरे प्रमाणमपि दर्शितं भवति । यथा घटादिकार्यं कर्तृजन्यं तथा क्षित्यंकु
रादिकमपि । नच तत्कर्तृत्वमस्मदादीनां संभवतीत्यतस्तत्कर्तृत्वेन कार्यत्वेन कार्यकारणभावएवानुकूलस्त ॥२॥
र्कः । धावाभूमीजनयंदेवएकः विश्वस्य कर्त्ता भुवनस्य गोप्ता इत्याद्य आगमा अप्यनुसंधेयाः । इदं मुरा

॥ निमित्तकारणायेत्यर्थः ३

नचिंता २

त्यादि । सत्तमस्याभावत्वकथनादेव पदार्थाभावत्वं प्राप्तं । तेन भावत्वेन पृथगुपन्यासो न कृतः । एतेच पदार्था वै
शेषिकप्रसिद्धाः । नैयायिकानामप्यविरुद्धाः । प्रतिपादितं चैवमेव भाष्ये । अतएवोक्तं मणौ सप्तपदा प२
र्थाभिन्नतया सादृश्यस्यातिरिक्तपदार्थत्वमाशंकितं । ननु कथमेतावंतएव पदार्थाः शक्तिसादृश्यादीना
मतिरिक्तपदार्थत्वात् । तथाहि मण्यादिसमवहितेन वह्निना दाहो न जन्यते तदभावेन तु जन्यते । तत्र मण्या
दिना वह्नौ दाहानुकूला शक्तिर्नाश्यते । उत्तेजकेन मण्याद्यपसारणेन च जन्यत इति कल्प्यते । एवं सादृश्य
मप्यतिरिक्तपदार्थः तद्धि न षट्सु भावेष्वंतर्भवति सामान्येपि सत्वात् । यथा गोत्वं नित्यं तथा अश्वत्वमपीति
सादृश्यप्रतीतेः । नाप्यभावे सत्वेन प्रतीयमानत्वादिति चेन्न । मण्याद्यभावविशिष्टवह्न्यादेर्दाहादिकं

॥३॥ प्रतिमण्यपत्नावादेरेव वा स्वातंत्र्येण हेतुत्वं कल्प्यते । अनेनैव सामंजस्ये अनंतशक्तितत्प्रागभावध्वंसकल्पनानौचि
त्यात् । नचउत्तेजके सति प्रतिबंधकसद्भावे कथं दाह इति वाच्यं उत्तेजकाभावविशिष्टमण्यभावस्य कारणत्वात् ।
सादृश्यमपि न पदार्थांतरं । किंतु तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्वं । यथा चंद्रभिन्नत्वे सति चंद्रगताह्लादकत्वा
दिमत्वं मुखे चंद्रसादृश्यमिति । द्रव्याणि विभजते ॥ क्षित्यबिति ॥ क्षितिः पृथिवी आपो जलानि । मरुद्वायुः । तेजःसोमादि ४
कालदिङ्मनांसि ५ व्योम आकाशं दिक् देही आत्मा । एतानि नवद्रव्याणीत्यर्थः । ननु द्रव्यत्वजातौ किं मानं । नहि प्रत्यक्षं तत्र प्रमाणं
घृतजतु प्रभृतिषु द्रव्यत्वाग्रहादिति चेन्न । कार्यसमवायिकारणतावच्छेदकतया संयोगस्य विभागस्य ॥३॥
समवायि वा कारणतावच्छेदकतया वा द्रव्यत्वसिद्धेरिति । नवद्रव्यमंतःकृत्य नोक्तं । तद्धि प्रत्यक्षेण गृह्यते । त
जाति १

स्य च रूपवत्वात् कर्मवत्वाच्च द्रव्यत्वं । तच्च गंधशून्यत्वान्न पृथिवी । नीलरूपवत्वाच्च न जलादिकं । तत्प्रत्यक्षे चालो
कनिरपेक्षं चक्षुः कारणमिति चेन्न । आवश्यकतेजोऽभावेनोपपत्तौ द्रव्यांतरकल्पनाया अन्याय्यत्वात् । रू
पवत्ताप्रतीतिस्तु भ्रमरूपा । कर्मप्रतीतिरपि आलोकापसारणौपाधिकी भ्रांतैव । तमसोऽतिरिक्तत्वे अनंता
वयवादिकल्पनागौरवं स्यात् । सुवर्णस्य यथा तैजसत्वं तथा वक्ष्यते । गुणान्विभजते । अथ गुणा इ
ति । एते गुणाश्चतुर्विंशतिसंख्याकाः कणादेनकंठतः च शब्देन च दर्शिताः । तत्र गुणत्वादिजातिसिद्धिर
ग्रे वक्ष्यते । कर्माणि विभजते । उत्क्षेपणमिति । कर्मत्वादिजातिस्तु प्रत्यक्षसिद्धा । उत्क्षेपणत्वादिक
मपि । ननु भ्रमणादिकमपि पृथक्कर्माधिक्यतया कुतो नोक्तं । अत आह । भ्रमणमिति । सामान्यं निरूपयति

॥४॥ ।सामान्यमिति ।तल्लक्षणं तु नित्यत्वे सत्यनेकसमवेतत्वं ।अनेकसमवेतत्वं संयोगादीनामप्यस्ति ।अत उक्तं नि
त्यत्वे सतीति ।नित्यत्वे सति समवेतत्वं गगनपरिमाणादीनामप्यस्त्यत उक्तं अनेकेति ।नित्यत्वे सत्यनेकवृत्तित्वं अ
त्यंताभावस्याप्यस्त्यतो वृत्ति सामान्यं विहाय समवेतेत्युक्तं ।एकमात्रव्यक्तिवृत्तिस्तु न जातिः ।तथा चोक्तं ।व्यक्ते
रभेदस्तुल्यत्वं संकरोथानवस्थितिः ।रूपहानिरसंबंधो जातिबाधकसंग्रहः ।द्रव्यादीति ।परत्वमधिकदेशवृत्ति
त्वं ।अपरत्वं अल्पदेशवृत्तित्वं ।सकलजात्यपेक्षया अधिकदेशवृत्तित्वात् सत्तायाः परत्वं ।तदपेक्षया चान्यासां
जातीनामपरत्वं ।व्यापकत्वादिति ।पृथिवीत्वाद्यपेक्षया व्यापकत्वादधिकदेशवृत्तित्वात्परत्वं ।सत्तापेक्षया व्या
२ द्रव्यत्वस्य प्य त्वादल्पदेशवृत्तित्वात् द्रव्यत्वस्यापरत्वं ।विशेषं निरूपयति ।अंत्य इति ।अंतेऽवसाने वर्त्तंत इत्यंत्याः यदपेक्षते ॥४॥

या विशेषो नास्तीत्यर्थः ।घटादीनां द्व्यणुकपर्यंतानां तत्तदवयवभेदात्परस्परं भेदः ।परमाणूनां परस्परभेदको ।विशेष एव
।स तु स्वत एव व्यावृत्तः तेन तत्र विशेषांतरापेक्षा नास्तीति भावः ।समवायं दर्शयति ।घटादीनामिति ।अवयवावय य
क्रिया विनोरिति व्यक्तिगुणगुणिनोः क्रियावतोर्नित्यद्रव्यविशेषयोश्च संबंधः समवायः समवायत्वं नित्यसंबंधत्वं ।तत्प्र
माणं तु गुणक्रियादिविशिष्टबुद्धिः विशेषणविशेष्यसंबंधविषया ।विशिष्टबुद्धित्वात् दंडीपुरुष इति विशिष्टबुद्धिवत् । इति
इत्यनुमानेन संयोगादिबाधात्समवायसंबंधसिद्धिः ।न च स्वरूपसंबंधेनासिद्धसाधनं अर्थांतरं वा ।अनंतस्वरू
पाणां संबंधत्वकल्पने गौरवात् ।लाघवादेकसमवायसिद्धिः ।न च समवायस्यैकत्वे वायौ रूपवत्ताबुद्धिप्रसं
गः ।तत्र रूपसमवायसत्वेपि रूपाभावात् ।न चैवमभावस्यापि वैशिष्ट्यं संबंधांतरं सिद्ध्येदिति वाच्यं ।तस्यानित्यत्वे

॥५॥ भूतले घटानयनानंतरमपि घटाभावबुद्धिप्रसंगात् । घटाभावस्य तत्र सत्त्वात् । तस्यानित्यत्वात् । अन्यथा देशांतरेपि घटा
त्यंताभावप्रतीतिर्न स्यात् । वैशिष्ट्यस्य च तत्र सत्त्वात् । मम तु घटे पाकरक्ततादशायां श्यामरूपस्य नष्टत्वान्न तद्वत्ताबुद्धिः । वै । शि
ष्ट्यस्यानित्यत्वे त्वनंतवैशिष्ट्यकल्पने तवैव गौरवं । इदं च तात्कालिकत्वं तत्तद्भूतलादिकं तत्तद्वृत्तावादीत । संक्षेपः ॥ अभाव
विभजते । अभावस्त्विति । अत्यंताभावत्वं व्याप्यादि घटात्यंताभावः संसर्गेति । संसर्गान्योन्याभावभेदादित्यर्थः । अन्योन्या
भावस्यैकविधत्वात्तद्विभागाभावात् । संसर्गाभावं विभजते । प्रागभावेति । संसर्गाभावत्वं अन्योन्याभावभिन्नाभा
वत्वं । अन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं । विनाश्यभावत्वं प्रागभावत्वं । जन्याभावत्वं ॥५॥
ध्वंसत्वं । नित्यसंसर्गाभावत्वमत्यंताभावत्वं । यत्र तु भूतलादौ घटादिकमपसारितं पुनरानीतं च तत्र घटकाल

स्य संबंधाघटकत्वादत्यंताभावस्य नित्यत्वेपि घटकालेन घटात्यंताभावबुद्धिः । तत्रोत्पादविनाशशाली च
तुर्थोयमभाव इति केचित् ॥ अत्र ध्वंसप्रागभावाधिकरणे नात्यंताभाव इति प्राचां मतं ॥ श्यामघटे रक्तो ना
स्ति रक्तघटे श्यामो नास्तीति धीः प्रागभावं ध्वंसं चावगाहते न तु तदत्यंताभावं तयोर्विरोधात् । नव्यास्तु
तत्र विरोधे मानाभावात् । ध्वंसकालावच्छेदेनात्यंताभावो वर्त्तत इत्याहुः ॥ नन्वत्यंताभावानामधिकरण
त्मकत्वं लाघवादिति चेन्न । अनंताधिकरणात्मकत्वापेक्षयातिरिक्तकल्पनाया एव लघीयस्त्वात् । एवं
चाधाराधेयभावोप्युपपद्यते ॥ एवं च तत्तच्छब्दगंधरसाद्यभावानां प्रत्यक्षसमुपपद्यते । अन्यथा तत्तदधि
करणानां तत्तदिंद्रियाग्राह्यत्वात्प्रत्यक्षत्वं न स्यात् । एतेन ज्ञानविशेषकालविशेषात्मकत्वमभावस्येति

सि॰मु॰ ६ प्रत्युक्तं॥ अप्रत्यक्षत्वापत्तेः॥ [redacted] इदानीं पदार्थानां साधर्म्यं वैधर्म्यं च वक्तुं प्रक्रमते। सप्तानामिति। समानो
धर्मो येषां ते सधर्माणस्तेषां भावः साधर्म्यं समानो धर्म इति फलितार्थः॥ एवं विरुद्धो धर्मो येषां ते विरुद्धध
र्माणस्तेषां भावो वैधर्म्यं विरुद्धो धर्म इति फलितार्थः। ज्ञेयत्वं ज्ञानविषयता। सा च सर्वत्रैवास्ति। ईश्वरादि
ज्ञानविषयतायाः केवलान्वयित्वात्॥ एवमभिधेयत्वप्रमेयत्वादिकं बोध्यं। द्रव्येति। द्रव्यगुणकर्मसामा
न्यविशेषाणां साधर्म्यं अनेकत्वं समवायित्वं च। यद्यप्यनेकत्वमभावेप्यस्ति तथाप्यनेकत्वे सति भावत्वं।
तथा चानेकभाववृत्तिपदार्थविभाजकोपाधिमत्त्वं फलितार्थः। तेन प्रत्येकं घटादौ नाव्याप्तिः। समवायि
संबंधेन त्वं समवाय संबंधित्वं न तु समवायवत्वं। सामान्यादावभावात्॥ सत्तावंत इति। द्रव्यगुणकर्मणां सत्तावत् ६

मित्यर्थः॥ गुणादिरिति। यद्यपि गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तं क्रियाशून्यत्वं च गगनादावव
धर्मवत्त्वं २ तिव्याप्तं तथापि गुणवद्वृत्तिकर्मवद्वृत्तिपदार्थविभाजकोपाधिमत्त्वं च तदर्थः। न हि घटत्वादिकं द्रव्यत्वं
वा गुणवद्वृत्ति कर्मवद्वृत्ति वा। किंतु गुणत्वादिकं तथा। आकाशत्वादिकं तु न पदार्थविभाजकोपाधिः सा
मान्यपरिहीनास्त्विति। सामान्यानधिकरणत्वं सामान्यादीनामित्यर्थः। पारिमांडल्यमिति। पारिमांडल्यम
दि२ णुपरिमाणं कारणत्वं न द्विन्नानामित्यर्थः। अणुपरिमाणं तु न कस्यापि कारणं। तद्धि स्वाश्रयारब्धद्रव्यपरिमा
णारंभकं भवेत्तच्च न संभवति परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वनियमान्महदारब्ध
स्य महत्तरत्ववदणुजन्यस्याणुतरत्वप्रसंगात्॥ एवं परमहत्परिमाणमतीन्द्रियं सामान्यं विशेषाश्च बोध्याः।

म२

सि·मु०
७

मानसप्रत्यक्षे आत्ममहत्त्वस्य कारणत्वात्परममहत्त्वं इमारणमाकाशादेर्बोध्यं। तस्यापि न कारणत्वमित्याचार्या
णामाशय इत्यन्ये तन्न। ज्ञानातिरिक्तं प्रत्यक्षकारणत्वाभावात् एवाचार्यैरुक्तत्वात्। इदमपि योगिप्रत्यक्षे विषयत्वेन का स्य
रणत्वं ज्ञायमानसामान्यं न प्रत्यासत्तिः ज्ञायमानलिंगं नानुमितिकरणमित्यभिप्रायेण। ननु कारणत्वे कि
मत आह। अन्यथेति। तस्य कारणत्वस्य। तत्रेति। समवायिकारणे प्रत्यासन्नं कारणं द्वितीयसमवायिकारण म४
मित्यर्थः। अत्र यद्यपि तुरीतंतुसंयोगस्य पटासमवायिकारणत्वं स्यादेवं वेगादीनामभिघाताद्यसमवायिका
रणत्वं स्यादेवं ज्ञानादिकं इच्छाद्यसमवायिकारणं स्यात्तथापि पटासमवायिकारणलक्षणे तुरीतंतुसंयोगभि
न्नत्वं देयं। तुरीतंतुसंयोगस्तु तुरीपटसंयोगं प्रत्यसमवायिकारणं भवत्येव। एवं वेगादिकं वेगस्पंदाद्यसमवा ७

ना१

यिकारणं भवत्येवेति। तत्तत्कार्यासमवायिकारणलक्षणे तत्तद्भिन्नत्वं देयं। आत्मविशेषगुणानां तु न कुत्राप्यस
मवायिकारणत्वं तेन तद्भिन्नत्वं सामान्यलक्षणे देयमेव। अत्र समवायिकारणप्रत्यासन्नं द्विविधं। कार्यैकार्थ
प्रत्यासत्त्या कारणैकार्थप्रत्यासत्त्या च। आद्यं यथा घटादिकं प्रति कपालसंयोगादिकं। तत्र कार्येण घटेन सह कारण यो३
स्य कपालसंयोगस्य एकस्मिन्कपाले प्रत्यासत्तिरस्ति। द्वितीयं यथा घटरूपं प्रति कपालरूपमसमवायिकारणं।
तत्र घटरूपं प्रति कारणेन घटेन सह कपालरूपस्यैकस्मिन्कपाले प्रत्यासत्तिरस्ति। तथा च क्वचित्समवायसंबं
धेन क्वचित्स्वसमवायिसमवायसंबंधेनेति फलितार्थः। इत्थं च कार्यैकार्थकारणैकार्थान्यतरप्रत्या कारणं ज्ञाना सत्या२
दिभिन्नं समवायिकारणमिति पर्यवसन्नं। आभ्यां समवायिकारणासमवायिकारणाभ्यां भिन्नं कारणं तृती

म१

अन्यथासिद्धत्वमेव कियंतीत्याह॥ येन सहेत्यादिना॥ कारणस्य कार्यं प्रति पूर्ववृत्तिता येन रूपेण गृह्यते तेन कार्यं प्रति तद्रूपं १

सि०मु० यं निमित्तकारणमित्यर्थः॥ इदानीमन्यथासिद्धमित्यर्थः॥ यथा घटं प्रति दंडत्वं॥ द्वितीयमन्यथासिद्धमाह॥ कारण
८ मादायेति॥ यस्य स्वातंत्र्येणान्वयव्यतिरेकौ न स्तः॥ किंतु कारणमादायान्वयव्यतिरेकौ गृह्येते तदन्यथासिद्धम्।
यथा दंडरूपं॥ तृतीयमाह॥ अन्यं प्रतीति॥ अन्यं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्य
ते तस्य तत्कार्यं प्रति अन्यथासिद्धत्वं॥ यथा घटादिकं प्रत्याकाशस्य॥ आकाशस्य हि घटादिकं प्रत्याकाशत्वेन
कारणत्वं स्यात्। आकाशत्वं तु शब्दसमवायिकारणत्वं॥ अतः शब्दं प्रति जनकत्वं गृहीत्वैव घटादिकं
प्रति जनकत्वं ग्राह्यमतस्तदन्यथासिद्धं॥ शब्दाश्रयस्य कारणत्वे कान्यथासिद्धिरिति चेत्‌ पंचमीति॥ आ
काशस्य शब्दं प्रति जनकत्वे किमवच्छेदकमिति चिंत्यं॥ कवत्वादिकं विशेषपदार्थे वेति॥ चतुर्थमन्यथासि ८

द्धमाह॥ जनकं प्रतीति॥ यत्कार्यजनकं प्रति पूर्ववृत्तित्वं गृहीत्वैव यस्य यत्कार्यं प्रति पूर्ववृत्तित्वं गृह्यते तस्य तत्कार्यं
प्रति अन्यथासिद्धत्वं॥ यथा कुलालपितुर्घटं प्रति॥ तस्य कुलालपितृत्वेन घटं प्रति जनकत्वेऽन्यथासिद्धिः॥ कुला
लत्वेन रूपेण जनकत्वे त्विष्टापत्तिः॥ कुलालमात्रस्य घटं प्रति जनकत्वात्॥ पंचममन्यथासिद्धमाह॥ अतिरि
क्तमिति॥ आवश्यकनियतपूर्ववृत्तिनैव कार्यसंभवे तद्भिन्नमन्यथासिद्धमित्यर्थः॥ अत एव प्रत्यक्षे महत्त्वं
कारणमनेकद्रव्यवत्त्वमन्यथासिद्धम्॥ तत्र हि महत्त्वमवश्यक्लृप्तं तेनानेकद्रव्यवत्त्वमन्यथासिद्धम्॥ न चैव वै
परीत्ये किं विनिगमकमिति वाच्यम्॥ महत्त्वजातेः कारणतावच्छेदकत्वे लाघवात्॥ रासभादीति॥ यद्घटव्यक्तिं
प्रति रासभस्य नियतपूर्ववृत्तित्वमस्ति तत्रापि घटजातीयं प्रति सिद्धकारणभावैर्दंडादिभिरेव तद्व्यक्तेः संभ

सि०मु०
६

विरासमीन्यथासिद्ध इति भावः। एतेष्विति। एतेषु पंचस्वन्यथासिद्धेषु मध्ये पंचमोन्यथासिद्ध आवश्यकस्ते
नैव परेषां चरितार्थत्वात्। तथाहि। दंडादिभिरवश्यक्लृप्तपूर्ववर्त्तिभिरेव कार्यसंभवे दंडत्वादिकमन्यथासि
द्धं। न च वैपरीत्ये किं विनिगमकमिति वाच्यम्। दंडत्वस्य कारणत्वे दंडघटितपरंपरायाः संबंधत्वे गौरवात्।
एवमन्येषामप्यनेन चरितार्थत्वं संभवति। समवायिकारणत्वमित्यादि। गुणकर्मेति। असमवायिकार
णत्वं गुणकर्मभिन्नानां वैधर्म्यं न तु गुणकर्मणोः साधर्म्यमित्यत्रापि तात्पर्यं। अथवा समवायिकारण
त्ववत् इति सत्ताभिन्नजातिमत्त्वं तदर्थः। ज्ञानादीनामसमवायिकारणत्वविरहेपि नाव्याप्तिः। अन्यत्रे
ति। नित्यद्रव्याणि परमाण्वाकाशादीनि विहायाश्रितत्वं साधर्म्यमित्यर्थः। आश्रितत्वं तु समवायसंबं ६

धेन वृत्तिमत्त्वं। विशेषणात्तया नित्यानामपि कालादौ वृत्तेः। इदानीं द्रव्यस्यैव विशिष्य साधर्म्यं वक्तुमुपक्रमते।
क्षित्यादीनामिति। क्षितिर्जलमिति। पृथिव्यप्तेजोवायुमनसां परत्वमपरत्वं मूर्त्तत्वं कर्मवत्त्वं वेगवत्त्वं च साध
र्म्यं। न च यत्र घटादौ परत्वमपरत्वं वा नोत्पन्नं तत्राव्याप्तिरिति वाच्यम्। परत्वादिसमानाधिकरणद्रव्यत्व
व्याप्यजातिमत्त्वस्य विवक्षितत्वात्। मूर्त्तत्वमपकृष्टपरिमाणवत्त्वं तच्चैतेषामेव। गगनादिपरिमाणस्याप
कृष्टत्वाभावात्। पूर्ववत्कर्मवत्त्वं कर्मसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वं। वेगवद्वृत्तिद्रव्यत्वव्याप्यजा
तिमत्त्वं च बोध्यम्। कालेत्यादि। कालाकाशात्मदिशां सर्वगतत्वं सर्वमूर्त्तसंयोगित्वं। परममहत्त्वं जाति
विशेषः। अपकर्षानाश्रयपरिमाणत्वं वा। क्षित्यादीति। पृथिव्यप्तेजोवाय्वाकाशादीनां भूतत्वं। तत्र

कारणतावच्छेदकधर्माक्रान्तत्वं स्वरूपयोग्यत्वं

सि॰मु॰ १०

हि रिंद्रियग्राह्यविशेषगुणवत्त्वं। अत्र ग्राह्यत्वं लौकिकप्रत्यक्षस्वरूपयोग्यत्वं बोध्यं तेन ज्ञातो घट इति प्रत्यक्षे ज्ञानस्याप्युप
नीतभानविषयत्वात् तद्वति आत्मनि नातिव्याप्तिः। न वा प्रत्यक्षाविषयरूपादिमति परमाण्वादावव्याप्तिः। तस्यापि स्वरू
पयोग्यत्वात्। महत्त्वलक्षणकारणांतरासंनिधानान्न प्रत्यक्षं। अथवा आत्मावृत्तिविशेषगुणवत्त्वं। चतुर्णामिति।
पृथिव्यप्तेजोवायूनां स्पर्शवत्त्वं। द्रव्यारंभ इति। पृथिव्यप्तेजोवायुषु चतुर्षु द्रव्यारंभकत्वं। न च द्रव्यानारंभके घ
टादावव्याप्तिः। द्रव्यसमवायिकारणवृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात्। अपेति। आकाशात्मनो
रव्याप्यवृत्तिक्षणिकविशेषगुणवत्त्वं। आकाशस्य विशेषगुणः शब्दः स चाव्याप्यवृत्तिः यदा किंचिदवच्छे
देन शब्द उत्पद्यते तदान्यावच्छेदेन तदभावस्यापि सत्त्वात्। क्षणिकत्वं च तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वं। १०

योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात्। प्रथमशब्दस्य द्वितीयशब्देन नाशः। एवं ज्ञानादीनामपि।
ज्ञानादिकं हि आत्मनि विभौ शरीराद्यवच्छेदे न जायते तदन्यावच्छेदेन तदभावोस्त्येव एवं ज्ञानादिकमपि
क्षणद्वयावस्थायि। इत्थमव्याप्यवृत्तिविशेषगुणवत्त्वं क्षणिकगुणवत्त्वं चार्थः। पृथिव्यादौ रूपादिवि
शेषगुणोस्तीत्यव्याप्यवृत्तीत्युक्तं। पृथिव्यादावव्याप्यवृत्तिसंयोगादिरस्तीति विशेषगुणेत्युक्तं। न च रू
पादीनामपि कदाचित्तृतीयक्षणे नाशसंभवात् क्षणिकविशेषगुणवत्त्वं क्षित्यादावतिव्याप्तमिति वा व२
च्यं। चतुःक्षणवृत्तिजन्यावृत्तिजातिमद्विशेषगुणवत्त्वस्य तदर्थत्वात्। अपेक्षाबुद्धिस्तु क्षणत्रयं ति
ष्ठति क्षणचतुष्टयं तु न किमपि ज्ञानादिकं तिष्ठति रूपत्वादिकं क्षणचतुष्टयस्थायिन्यपि रूपादौ

सि॰मु॰ वर्त्ततइतितद्व्युदासः।ईश्वरज्ञानस्यचतुःक्षणवृत्तित्वा त्।ज्ञानत्वस्यतद्वृत्तित्वात्।अन्येतुकूममायथाकाश
११ जीवात्मनोःसाधर्म्यंतदाजन्येतिनदेयम्।द्वित्वादिकमादायलक्षणसमन्वयात्।परममहत्त्वस्यतादृश
गुणत्वात्।चतुर्थक्षणेद्वित्वादीनांनाशाभ्युपगमात्।द्वित्वादीनामपितथात्वात्।तद्वारणायविशेषेति।त्रि
क्षणवृत्तित्वंवावाच्यम्।इच्छादिकमादायलक्षणसमन्वयात्।रूपेति।पृथिव्यप्तेजसांरूपवत्त्वं।इदंचप्र त्वच४
त्यक्षविषयत्वंचेत्यर्थः।नचचक्षुरादीनांभर्जनकपालस्थवह्नेःरूपप्रमाणत्वरूपवत्त्वेकिंमानमितिवाच्यम्।
तत्रापितेजस्त्वेनरूपानुमानात्।एवंवायवानीमपृथिवीजलतेजोभागानामपिपृथिवीत्वादिनारूपा
नुमानंबोध्यम्।नचघटादौद्रुतसुवर्णादिभिन्नेतेजसिचइदंलक्षणमव्याप्तमितिवाच्यम्।इदंत्वव ११

वत्व१

वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्।नचजतुप्रभृतिषुपृथिवीषुजलेषुद्रुतसुवर्णादौतेज
सिचइदंत्वस्यसत्त्वात्तत्रचपृथिवीत्वादिसत्त्वात्तदादायसर्वत्रलक्षणसमन्वयः।नचप्रदेशविषयत्वंप त्व२
रमाण्वादावव्याप्तमतिव्याप्तंचरूपादावितिवाच्यम्।चाक्षुषप्रत्यक्षविषयवृत्तिद्रव्यत्वव्याप्यजातिम
त्त्वस्यविवक्षितत्वात्।आत्मन्यतिव्याप्तिवारणायचाक्षुषेति।गुरुणीति।गुरुत्ववत्त्वंरसवत्त्वंचपृथि
वीजलयोरित्यर्थः।नचघ्राणेन्द्रियादीनांवायवानीतपार्थिवादिभागानांचरसादिमत्त्वेकिंमानमि
तिवाच्यम्।तत्रापिपृथिवीत्वादिनातदनुमानात्।द्वयोरिति।पृथिवीतेजसोरित्यर्थः।नचघटादौ
वह्न्यादौचाव्याप्तम्।नैमित्तिकद्रवत्वसमानाधिकरणद्रव्यत्वव्याप्यजातिमत्त्वस्यविवक्षितत्वात्।

सि॰मु॰
१२

आत्ममन इति। पृथिव्यप्तेजोवाय्वाकाशात्ममनसां। विशेषगुणवत्त्वमित्यर्थः। यदुक्तमिति। द्रव्यत्वादिकं विहायेति। यो
ध्यमूर्त्तत्वं तु न कस्यापि वैधर्म्यं केवलान्वयित्वात्। तासां धर्म्यवैधर्म्ये निरूप्य संप्रति प्रत्येकं पृथिव्यादिकं निरू
पयति। तत्रेति। क्षितिरित्यादिना। गंधहेतुः गंधसमवायिकारणमित्यर्थः। यद्यपि गंधवत्त्वमात्रं पृथिव्या लक्षण
मुचितं तथापि पृथिवीत्वजातौ प्रमाणोपन्यासाय कारणत्वमुपन्यस्तम्। तथा हि। पृथिवीत्वं हि गंधसमवा
यिकारणतावच्छेदकतया सिध्यति अन्यथा गंधत्वावच्छिन्नगंधस्याकस्मिकत्वापत्तेः। न च पाषाणादौ गंधा
भावाद् गंधवत्त्वमव्याप्तमिति वाच्यम्। तत्रापि गंधवत्त्वात्। अनुपलब्धिस्त्वनुत्कटत्वेनाप्युपपद्यते कथमन्यथा
तद्भस्मनि गंधोपलब्धिः। भस्मनो हि पाषाणध्वंसजन्यत्वात् पाषाणोपादानोपादेयत्वं च सिध्यति। यत्तु द्र १२

व्यं यत् द्रव्यध्वंसजन्यं तत्तदुपादानोपादेयमिति व्याप्तेः। दृष्टं चैतत् खंडपटे महापटध्वंसजन्ये। इत्थं च पाषा
णपरमाणोः पृथिवीत्वात् तज्जन्यपाषाणस्यापि पृथिवीत्वं। तथा च तस्यापि गंधवत्त्वे बाधकाभावात्। ना
नारूपेति। शुक्लनीलादि भेदेन नानाजातीयरूपं पृथिव्यामेव वर्त्तते। न तु जलादौ तत्र शुक्लस्यैव स
त्त्वात्। पृथिव्यां त्वेकस्मिन्नपि धर्मिणि पाकवशेन नानारूपसंभवात्। न च यत्र नानारूपं नोत्पन्नं तत्राव्या
प्तिः रूपध्वंसवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य रूपनाशवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वस्य वा वाच्यत्वात्।
वैशेषिकनयेपि पृथिवीपरमाणौ रूपनाशस्य रूपांतरस्य च सत्त्वात्। न्यायनये घटादावपि तत्सत्त्वाल्लक्ष
णसमन्वयः। षड्विधस्त्विति। मधुरकटुकषायादिभेदेन यः षड्विधो रसः स पृथिव्यामेव। जले तु मधुर ए

सि॰मु॰ वरसः। अत्रापि पूर्ववद्रसवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वं लक्षणार्थो वाच्यः। गंधस्तु द्विविध इति। यस्तु स्थितिमा
३३ त्रं न तु द्वैविध्यं गंधवत्त्वमपि लक्षणं द्विविधस्याप्यर्थत्वात्। द्वैविध्यं च सौरभासौरभभेदेन ज्ञेयं। स्पर्शस्तस्या इति।
तस्याः पृथिव्याः अनुष्णाशीतस्पर्शवत्त्वं वाय्वावपि वर्त्तत इत्यत उक्तम्। पाकज इति। इत्थं च पृथिव्याः स्पर्शोऽनुष्णा
शीत इति ज्ञापनार्थं तदुक्तं पाकजस्पर्शवत्त्वमात्रं लक्षणं अधिकस्य वैयर्थ्यात्। यद्यपि पाकजस्पर्शः पटादौ नास्ति
त्वा॰२ तथापि पाकजस्पर्शवद्वृत्तिद्रव्यत्वव्याप्यजातिमत्त्वमर्थो बोध्यः। नित्येति। सा पृथिवी द्विविधा नित्याऽनित्या चेत्यर्थः।
अणुलक्षणा परमाणुरूपा पृथिवी नित्या। तदन्या परमाणुभिन्ना पृथिवी द्व्यणुकादिरूपा सर्वाप्यनित्येत्यर्थः। सैवा कादिरू २
नित्या पृथिव्येवावयववतीत्यर्थः। नन्ववयविनि किं मानं। परमाणुपुंजैरेवोपपत्तेः। न च परमाणूनामतीन्द्रि ३३

यत्वात् घटादेः प्रत्यक्षत्वं न स्यादिति वाच्यम्। एकस्य परमाणोरप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वात्। यथा
एककेशस्य दूरे अप्रत्यक्षत्वेऽपि तत्समूहस्य प्रत्यक्षत्वम्। न चैकः स्थूलो घट इति बुद्धिरनुपपन्नेति वाच्यम्।
एको महान् धान्यराशिरितिवदुपपत्तेः। मैवं। परमाणोरतीन्द्रियत्वेन तत्समूहस्यापि प्रत्यक्षत्वायोगात्। दूरस्थके
शस्तु नातीन्द्रियः सन्निधाने तस्यैव प्रत्यक्षत्वात्। न च तदानीं दृश्यपरमाणुपुंजस्योत्पन्नत्वात् प्रत्यक्षत्वेऽपि वि
रोध इति वाच्यम्। अदृश्यस्य दृश्यानुत्पादात्। अन्यथा चक्षुरूष्मादिसंततौ कदाचित् दृश्यत्वप्रसंगात्। न चाति
प्रत्यासत्त्यादौ कथमदृश्यदहनसंततौ दृश्यदहनोत्पत्तिरिति वाच्यम्। तत्र तदंतःपातिदृश्यदहनावयवैः स्थू
लदहनोत्पत्तेरभ्युपगमात्। न चादृश्येन घ्राणुकेन कथं दृश्यत्रसरेणोरुत्पत्तिरिति वाच्यम्। यतो न वयं दृश्यत्व

मदृश्यत्वं वा कस्यचित्स्वभावादाचक्ष्महे। परंतु महत्त्वोद्भूतरूपादिकारणसमुदायवशात् दृश्यत्वम्। तदभावे
चादृश्यत्वं। त्रसरेणोर्महत्त्वात्प्रत्यक्षत्वं न तु द्व्यणुकादेस्तदभावात्। नहि त्वन्मतेपीदृशं भवति परमाणोर्म
हत्त्वाभावात्। एवं चावयविसिद्धौ तेषामुत्पत्तिविनाशयोः प्रत्यक्षसिद्धत्वादनित्यत्वं तेषां चावयव धा वावयव
राया अनंतत्वे मेरुसर्षपयोरपि साम्यप्रसंगः अतः क्वचिद्विश्रामः स्वीकर्तव्यः। यत्र विश्रामस्तस्यानित्य
त्वे चासमवेत कार्योत्पत्तिप्रसंगात्तस्य नित्यत्वं॥ महत्परिमाणतारतम्यस्य गगनादौ विश्रांतत्वमिव
ण·र अणुपरिमाण तारतम्यस्यापि क्वचिद्विश्रांतत्वमस्तीति तस्य परमाणुत्वसिद्धिः॥ न च त्रसरेणावेव वि
श्रामोस्त्विति वाच्यम्॥ त्रसरेणुः सावयवः चाक्षुषद्रव्यत्वात् घटवदित्यनुमानेन तदवयवसिद्धौ त्र १४

सरेणोरवयवाः सावयवाः महदारंभकत्वात् कपालवदित्यनुमानेन सावयवत्वसिद्धेः। न चेदमप्रयोज
कम्। अपकृष्टमहत्त्वं प्रत्यनेकद्रव्यत्वस्य प्रयोजकत्वात्। न चैवं क्रमेण तदवयवधारापि सिध्येदिति वा
च्यम्। अनवस्थाभयेन तदसिद्धेः। सा चेति। सा कार्यरूपा पृथिवी त्रिधा शरीरेंद्रियविषयभेदादित्यर्थः
तत्र देहमुदाहरति। योनिजादीति। योनिजमयोनिजं चेत्यर्थः। योनिजमपि द्विविधं जरायुजमंडजं चे
रा३ ति जरायुजं मनुष्यादीनां। अंडजं सर्पादीनां। अयोनिजं स्वेदजोद्भिज्जादिकं। स्वेदजाः कृमिदंशाद्याः। उद्भि जो३
ज्जास्तरुगुल्माद्याः। नारकीणां शरीरमप्ययोनिजं न च मानुषादिशरीराणां पार्थिवत्वे किं मानमिति वा
च्यम्। गंधादिमत्त्वस्यैव प्रमाणत्वात्। न च क्लेदोष्मादिरूपलंभादाप्यत्वादिकमपि स्यादिति वाच्यम्। तथा

सिमु०
५५

त्वे जलत्वपृथिवीत्वादिना संकरप्रसंगात्। न च तर्हि जलत्वादिकमेवास्तु न तु पार्थिवत्वमिति वाच्यम्।
हृदादीनां विनाशेऽपि शरीरत्वेन प्रत्यभिज्ञानात्। गंधाद्युपलब्धेश्च पृथिवीत्वसिद्धेः। तेन पार्थिवशरी
रे जलादीनां निमित्तमात्रत्वं बोध्यम्। शरीरत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात्। किंतु चेष्टाश्र
यत्वं वृक्षादीनामपि चेष्टाश्रयत्वान्नाव्याप्तिः। न च वृक्षादेः शरीरत्वे किं मानमिति वाच्यम्। आध्यात्मि
कवायुसंबंधस्य प्रमाणत्वात्। तत्रैव किं मानमिति चेन्न। भग्नक्षतसंरोहणादिना तदुन्नयात्। यदि
हस्तादौ शरीरव्यवहारो न भवति तदांत्यावयवित्वेन विशेषणीयम्। न च यत्र शरीरे चेष्टा न जाता
तत्राव्याप्तिरिति वाच्यम्। तादृशे प्रमाणाभावात्। अथवा चेष्टावदंत्यावयविवृत्तिद्रव्यत्वव्याप्यजाति ५५

मत्वम्। अंत्यावयविमात्रवृत्तिचेष्टावद्वृत्तिजातिमत्त्वं वा। मानुषत्वचैत्रत्वादिजातिमादाय लक्षण
समन्वयः। न च नृसिंहशरीरे कथमेतल्लक्षणसमन्वयः। तत्र नृसिंहत्वस्यैकव्यक्तिवृत्तितया जातिमत्वा वृत्ति२
भावात्। जलीयतैजसशरीरवृत्तितया देवत्वस्यापि जातित्वाभावादिति वाच्यम्। कल्पभेदेन नृसि
हशरीरस्य नानात्वेन नृसिंहत्वजात्या लक्षणसमन्वयः। इंद्रियमिति। घ्राणेंद्रियं पार्थिवमित्यर्थः। पा
र्थिवत्वं कथमिति चेदित्थम्। घ्राणेंद्रियं पार्थिवं रूपादिषु मध्ये गंधस्यैव व्यंजकत्वात्। कुंकुमगंधा
भिव्यंजकघृतादिवत्। न च दृष्टांते स्वीयरूपादिव्यंजकत्वादसिद्धिरिति वाच्यम्। परकीयरूपा
द्यव्यंजकत्वस्य तदर्थत्वात्। न च नवशरावगंधव्यंजके जलेऽनैकांतिकमिति वाच्यम्। तस्य सक्तुर

सि॰मु॰ १९ साभिव्यंजकत्वात् यद्वा परकीयेति न देयम्। वायूपनीतसुरभिभागस्य दृष्टांतत्वसंभवात्। न च घ्राणेंद्रियसं
निकर्षस्य गंधमात्रव्यंजकत्वात्तत्र व्यभिचार इति वाच्यम् उद्भूतत्वस्य सतीति विशेषणात्। विषय इति। उपभो
गसाधनं हि विषयः। सर्वमेव हि कार्यजातं अदृष्टाधीनं। यच्च कार्यं यददृष्टाधीनं तत्तदुपभोगसाक्षात्प
रंपरया वा जनयत्येव। न हि बीजप्रयोजनाभ्यां विना कस्यचिदुत्पत्तिरस्ति। तेन द्व्यणुकादिकं ब्रह्मांडांतं स
र्वमेव विषयो भवति। शरीरेंद्रिययोर्विषयत्वेपि प्रकारांतरेणोपन्यासः। शिष्यबुद्धिवैशद्यार्थः। जलं नि
रूपयति। वर्णः शुक्ल इति। स्नेहसमवायिकारणतावच्छेदकतया जलत्वजातिः सिद्ध्यति। यद्यपि स्ने
हत्वं नित्यानित्यवृत्तितया न कार्यतावच्छेदकं तथापि जन्यस्नेहत्वं तथा बोध्यम्। अथ परमाणौ जल १९

त्वं न स्यात्तत्र जन्यस्नेहाभावात्। तस्य च नित्यस्य स्वरूपयोग्यत्वे फलावश्यंभावनियमादिति चेन्न। जन्य
तर स्नेहजनकतावच्छेदकतया जन्यजलत्वजातेः सिद्धौ तदवच्छिन्नजनकतावच्छेदकतया जलत्वजाति
३ वत्व सिद्धेः। शुक्लरूपमेव जलस्येति दर्शयितुमुक्तं वर्णः शुक्ल इति न तु शुक्लरूपवत्त्वं लक्षणम्। अथवा नै
मित्तिकद्रवत्ववद्वृत्तिशुक्लरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं। अभास्वरशुक्लेतररूपासमा
नाधिकरणरूपवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। तेन स्फटिकादौ नातिव्याप्तिः। रसस्प
र्शाविति। जलस्य मधुर एव रसः। शीत एव स्पर्श इति क[illegible] वृत्तिमधुरवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिम द्रव२
त्वं शीतेतरस्पर्शवद्वृत्तिशीतस्पर्शवद्वृत्तिद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं वा तदर्थः। तेन शर्करा

वत्२

सि॰मु॰ १७ दौ नातिव्याप्तिः॥ ननु जले शुक्लरूपमेवेति कुतः। कालिंदीजलादौ नीलिमोपलब्धेरिति चेन्न। नीलज
नकतावच्छेदिकायाः पृथिवीत्वजातेरभावात्। जले नीलरूपाभावात्। कालिंदीजले नीलत्व सं २
व्यांतिरेव २ प्रतीतिस्त्वाश्रयौपाधिकी अतएव वियति वि क्षेपे धवलिमोपलब्धिः॥ अथ जले माधुर्ये किं मा
नं॥ नहि प्रत्यक्षेण कोपि रसस्तत्रानुभूयते॥ नच नारिकेलजलादौ माधुर्यमुपलभ्यत एवेति
वाच्यम्॥ तस्याश्रयौपाधिकत्वादन्यथा जंबीररकरवीरा दौ आम्लोपलब्धेराम्ला दिमत्त्वमपि म्लर ३
स्यादिति चेन्न॥ हरीतक्यादिभक्षणस्य जलरसाभिव्यंजकत्वात्। नच हरीतक्यामेव जलोष्मसं
योगाद्रसांतरोपलब्धिरिति वाच्यम्। कल्पनागौरवात्॥ पृथिवीत्वस्याम्लादिजनकतावच्छेदक १७

त्वाच्च जलेनाम्लादिकम्॥ जंबीररसादौ त्वाश्रयौपाधिकी तथा प्रतीतिः। एवं जन्यशीतस्पर्शजनक
तावच्छेदकं जलत्वं जन्यजलत्वं वा बोध्यम्॥ एवं चंदनादौ शैत्योपलब्धिश्चंदनांतर्वर्त्तिशीतत
रसलिलस्यैव तेजःसंयोगाज्जले उष्ण त्वप्रतीतिराश्रयौपाधिकी स्फुटैव तत्र पाकासंभवात्। स्ने
हत्वेति॥ घृतादावपि तदंतर्वर्त्तिजलस्यैव स्नेहः जलस्य स्नेहसमवायिकारणत्वात्॥ तेन ज
ले एव स्नेह इति मंतव्यम्॥ द्रवत्वमिति॥ सांसिद्धिकद्रवत्वं जाति विशेषः प्रत्यक्षसिद्धः॥ त
दवच्छिन्नजनकतावच्छेदकमपि तदेवेति भावः॥ तैलादावपि जलस्यैव द्रवत्वं स्नेहप्रकर्षेण च
दहनानुकूल्यमिति वक्ष्यते॥ नित्यतादि प्रथमवदिति॥ पृथिव्या इवेत्यर्थः॥ तथाहि। जलं द्विवि

सि॰मु॰ धं। नित्यमनित्यं च। परमाणुरूपं नित्यम्॥ द्व्यणुकादिरूपं सर्वमनित्यम वयवसमवेतं च।
१८ अनित्यमपि त्रिविधम्॥ शरीरेंद्रियविषयभेदात्॥ पृथिवीतोययोविशेषस्तमाह॥ किंत्विति॥ अ
योनिजमिति॥ अयोनिजमेवेत्यर्थः॥ वरुणलोके प्रसिद्धम्॥ इंद्रियं रसनमिति। जलीयमित्यर्थः
ध४ तथा हि॥ रसनं जलीयं गंधाव्यंजकत्वे सति रसाभिव्यंजकत्वात्॥ सक्तुरसाभिव्यंजकोदकवद्वायूप ति४
जल३ नीतशीतंभागवद्वा॥ रसनसन्निकर्षव्यभिचारवारणाय द्रव्यत्वं देयम्॥ विषयं दर्शयति॥ सिंधु
हिमादिरिति॥ सिंधुः समुद्रः॥ हिमं तुषारः॥ आदिपदात्सरित्कासारकरकादिः सर्वोपि ग्राह्यः॥ न
च हिमकरकयोः कठिनत्वात्पार्थिवत्वमिति वाच्यम्॥ ऊष्मणा विलीनयोस्तयोर्जलत्वस्य प्रत्यक्षसि १८
त१

द्धत्वात्॥ यत्र द्रव्यं यत्र द्रव्यध्वंसजन्यमिति व्याप्तेर्जलोपादानोपादेयत्वसिद्धेः॥ अदृष्टविशेषेण
प्र२ द्रवत्वप्रतिरोधात्करकायां काठिन्यप्रत्ययस्य भ्रांतत्वात्॥ तेजो निरूपयति॥ स्पर्शउष्ण इ
ना३ त्यादि॥ उष्णत्वं स्पर्शनिष्ठो जातिविशेषः प्रत्यक्षसिद्धः॥ इत्थं च जन्योष्णस्पर्शसमवायिका
रणतावच्छेदकं तेजस्त्वं जातिविशेषं तस्य परमाणुवृत्तित्वं तु जलत्वस्येवानुसंधेयम्॥ न चो
य३ ष्णस्पर्शत्वं चंद्रकिरणादावव्याप्तमिति वाच्यम्॥ तत्राप्युष्णत्वसत्वात्॥ किंतु तदंतःपातिज
लस्पर्शेनाभिभवादग्रहः॥ एवं रत्नकिरणादौ पार्थिवस्पर्शेनाभिभवा चक्षुरादौ चानु
द्भूतत्वात्तदग्रहः॥ रूपमित्यादि। वैश्वानरे मरकतकिरणादौ पार्थिवरूपेणाभिभवाच्छुक्लत्वा
च१

सि॰मु॰
२४

ग्रहः। तद्रूपाग्रहे धर्मिणोपि चाक्षुषत्वं नस्यादिति चेन्न। अन्यदीयरूपेणैव धर्मिणो ग्रहसंभवात्। ग१
शंखस्येव पित्तपीतिम्ना।। वह्नेस्तु शुक्लरूपं नाभिभूतं किंतु तदीयं शुक्लत्वमभिभूतमित्यन्ये। नैमि
त्तिकमिति। सुवर्णादिरूपे तेजसि तत्सत्वात्। न च नैमित्तिकद्रवत्वं दहनादावव्याप्तं घृतादावति खव२
व्याप्तं चेति वाच्यम्।। पृथिव्यवृत्ति नैमित्तिकद्रवत्ववद्वृत्ति द्रव्यत्वव्याप्यजातिमत्त्वस्य विवक्षि
तत्वात्।। पूर्ववदिति।। जलस्येवेत्यर्थः। तथाहि तत् द्विविधम्।। नित्यमनित्यं च। नित्यं परमाणु
रूपं तदन्यदनित्यमवयवि। तच्च त्रिधा।। शरीरेंद्रियविषयभेदात्। शरीरमयोनिजमेव।
तच्च सूर्यलोकादौ प्रसिद्धम्। अत्रेयोविशेषस्तमाह।। इंद्रियमिति।। चक्षुस्तैजसं परकी २४

यस्पर्शाद्यव्यंजकत्वे सति परकीयरूपव्यंजकत्वात् प्रदीपवत्। प्रदीपस्य स्वीयस्पर्शव्यंजक
त्वात्प्रथमं परकीयेति। घटादेः स्वीयरूपव्यंजकत्वाद्व्यभिचारवारणाय द्वितीयं परकीयेति।
अथवा प्रभायां दृष्टांतत्वसंभवादाद्यं परकीयेति न देयम्।। चक्षुःसन्निकर्षे व्यभिचारवार
णाय द्रव्यत्वं देयम्। विषयं दर्शयति। वह्नीति। ननु सुवर्णस्य तैजसत्वे किं मानमिति चेन्न।
सुवर्णं तैजसं असति प्रतिबंधके अत्यंतानलसंयोगेप्यनुछिद्यमानद्रवत्वात्। यन्नैवं त
न्नैवं यथा पृथिवीति। न चाप्रयोजकं। पृथिवीद्रवत्वस्य जलद्रवत्वस्य चाग्निसंयोगनाश्य
त्वात्। ननु पीतिमगुरुत्वाश्रयस्य पार्थिवस्यापि तदानीं द्रवत्वात्तेन व्यभिचार इति चेन्न।

सि॰मु॰
२०

जलमध्यस्थमसीछोदवत्तस्यद्रवत्वात्॥ अपरे तु पीतिमाश्रयस्याग्निसंयोगेपि रूपापरा
वृत्तिदर्शनात्तत्प्रतिबंधकं विजातीयद्रवत्वं कल्प्यते॥ तथाहि। अग्निसंयोगेपि पीतिम गुरु
त्वाश्रयः विजातीयरूपप्रतिबंधकद्रवद्रव्यसंयुक्तः। अत्यंताग्निसंयोगे पूर्वरूपविजातीय
रूपानधिकरणत्वात्॥ जलमध्यस्थपीतपटवत्। तस्य च पृथिवीजलभिन्नस्य तेजस्त्व
अ२ नियमात्॥ वायुं निरूपयति। पाकज इति। अनुष्णाशीतस्पर्शस्य पृथिव्यामपि सत्वादुक्तं
अपाकज इति। अपाकजस्पर्शस्य जलादावपि सत्वादुक्तमनुष्णाशीत इति। एतेन वायवी
यो विजातीयस्पर्शो दर्शितः। तज्जनकतावच्छेदकं वायुत्वमिति भावः। एष वायुः स्पर्शादि २०

था २

लिंगकः। वायुर्हि स्पर्शशब्दधृतिकंपैरनुमीयते विजातीयस्पर्शेन विलक्षणशब्देन तृणा
दीनां धृत्या शाखादीनां कंपेन च वायोरनुमापनात्। यथा च वायुर्न प्रत्यक्षस्तथाग्रे वक्ष्या
ति॥ पूर्ववदिति॥ वायुर्द्विविधो नित्योऽनित्यश्च। परमाणुरूपो नित्यः तदन्योऽनित्यः सम
वेतश्च। सोपि त्रिविधः। शरीरेंद्रियविषयभेदात्। तत्र शरीरमयोनिजं पिशाचादीनां। पर
न्तु जलीयतैजसवायवीयशरीराणाम् पार्थिवभागोपष्टंभकत्वेनोपभोगक्षमत्वम्।
जलादीनां प्राधान्याज्जलीयत्वादिकमिति। अत्रयो विशेषस्तमाह। देहव्यापीति। शरी
रव्यापकं स्पर्शग्राहकमिंद्रियं त्वक्। तच्च वायवीयं। रूपादिषु पंचसु मध्ये स्पर्शस्यैवाभि

तुविध्यः। तसवर

व्यंजकत्वात्। अंगसंगिसलिलशैत्याभिव्यंजकव्यजनपवनवत्। विषयं दर्शयति। प्राणादिरिति। यद्य
प्येको वायुश्चतुर्थी विधा प्राणापानादिरित्युक्तमाकरे तथापि संक्षेपादत्र त्रैविध्यमुक्तम्। प्राणस्त्वेक
एव हृदयादिनानास्थानवशान्मुखनिर्गमादिक्रियावशाच्च नानासंज्ञां लभते। आकाशं निरूपयति।
आकाशस्येति। आकाशकालदिशामेकैकव्यक्तिकत्वादाकाशत्वादिकं न जातिः किंतु शब्दाश्रयत्व
म्। वैशेषिक इति कथनं तु विशेषगुणांतरव्यवच्छेदाय। एतेन प्रमाणमपि दर्शितम्। तथाहि शब्दो
गुणश्चक्षुर्ग्रहणायोग्यबहिरिंद्रियग्राह्यजातिमत्त्वात् स्पर्शवत्। शब्दो द्रव्यसमवेतो गुणत्वादित्य
नुमानेन शब्दस्य द्रव्यसमवेतत्वसिद्धौ शब्दो न स्पर्शवद्विशेषगुणः अग्निसंयोगासमवायिकारण

कत्वाभावे सति अकारणगुणपूर्वकप्रत्यक्षत्वात् सुखवत्। पाकजरूपादौ व्यभिचारवारणाय सत्यंत
मिति। पटरूपादौ व्यभिचारवारणाय अकारणगुणपूर्वकेति। जलपरमाणुरूपादौ व्यभिचारवारणा
य प्रत्यक्षेति। न दिक्कालमनोगुणः विशेषगुणत्वात्। नात्मविशेषगुणः बहिरिंद्रियग्राह्यत्वात् रूपवत् १ रूपवत्-व्यतिरेके संयोगवत्
इत्थं च शब्दाधिकरणं नवमं द्रव्यं गगननामकं सिध्यति। न च वायवीयेषु सूक्ष्मशब्दक्रमेण वायौ का
रणगुणपूर्वकः शब्द उत्पद्यतामिति वाच्यम्। अयावद्द्रव्यभावित्वेन वायुविशेषगुणत्वाभावात्। तत्र श
रीरस्य विषयस्य चाभावादिंद्रियं दर्शयति। इंद्रियं तु भवेदिति। नन्वाकाशं लाघवादेकं सिद्धं श्रोत्रं तु पु
रुषभेदेन भिन्नं कथमाकाशः स्यादत आह। एकः सन्निति। आकाश एकः सन्नपि उपाधेः कर्ण

ख्याभ्यन्तराकाशजन्यप्राकाशप्रतियोगियपन्तद्गिलतं

सि·मु·
२२

शाकल्यादिर्भेदाद्भिन्नभिन्नश्रोत्रात्मको भवतीत्यर्थः। कालं निरूपयति। जन्यानां जनक इति। तत्र प्रमाणं
दर्शयितुमाह जगतामिति। इदानीं घट इत्यादिप्रतीतिः सूर्यपरिस्पन्दादिकं यदा विषयीकरोति तदा सूर्यप-
रिस्पन्दादिना घटादेः संबन्धो वाच्यः। स च संयोगादिर्न संभवतीति काल एव संबन्धघटकः कल्प्यते। इत्थं च त-
स्याश्रयत्वं सम्यक् प्रमाणं तरं दर्शयति। परापरत्वेति। परत्वादिबुद्धेरसाधारणं निमित्तं काल एव। परापर-
त्वयोरसमवायिकारणसंयोगाश्रयो लाघवादतिरिक्तः कल्प्यत इति भावः। नन्वेकस्य कालस्य सिद्धौ क्षणादिन-
मासवर्षादिसमयभेदो न स्यादत आह। क्षणादिरिति। कालस्त्वेकोऽप्युपाधिभेदात् क्षणादिव्यवहारवि-
षयः। उपाधिस्तु स्वजन्यविभागप्रागभावावच्छिन्नं कर्म पूर्वसंयोगावच्छिन्नविभागो वा। पूर्वसंयोगा-
नाशावच्छिन्नोत्तरसंयोगप्रागभावो वा। उत्तरसंयोगावच्छिन्नं कर्म वा। न चोत्तरसंयोगानन्तरं स २२

दा व्यवहारो न स्यादिति वाच्यम्। कर्मान्तरसत्त्वादिति। महाप्रलये क्षणादिव्यवहारो यद्यस्ति तदाऽनायत्या ध्वंसेनैवोपपादनी-
य इति। दिशं निरूपयति। दूरान्तिकेति। दूरत्वमन्तिकत्वं च दैशिकपरत्वापरत्वं च बोध्यम्। तद्बुद्धेरसाधारणं बीजं दिगेव। दैशिक-
परत्वापरत्वयोरसमवायिकारणसंयोगाश्रयतया दिक् सिध्यतीति भावः। ननु एकैव दिक् यदि तदा प्राचीप्रतीच्यादिव्य-
वहारः कथमुपपद्यतामत आह। उपाधीति। यत्पुरुषस्य उदयगिरिसन्निहिता या दिक् तत्पुरुषस्य सा प्राची। एवं उदयगि-
रिव्यवहिता च प्रतीची। एवं तत्पुरुषीयसुमेरुसन्निहिता दिगुदीची। तद्व्यवहिता त्ववाची दक्षिणा। सर्वेषामेव वर्षाणां
मेरुरुत्तरतः स्थित इति नियमात्। आत्मानं निरूपयति। आत्मेन्द्रियेति। आत्मत्वजातिस्तु सुखदुःखादिसमवायिका-
रणतावच्छेदकतया सिध्यति। ईश्वरेऽपि सा जातिरस्ति। एवमदृष्टादिरूपकारणाभावान्न सुखदुःखाद्युत्पत्तिः। नि

गोचर इति प्रति२

सि॰मु॰ त्यस्य स्वरूपयोग्यस्य फलावश्यंभाव इत्यस्याप्रयोजकत्वात्। अपरेष्वपि शरीरेषु ज्ञानोत्पत्तिर्न स्यादिति प्रमाणाभावात्। न च दशमद्रव्यत्वापत्तिः।
२३ ज्ञानवत्त्वेन विभजनादित्याहुः। इंद्रियादीनिति। अधिष्ठाता इंद्रियाणां शरीरस्य च परंपरया चैतन्यसंपादकः। यद्यप्यात्मनि अहं जाने अ-
हं सुखीत्यादिप्रत्यक्षविषयत्वमस्त्येव तथापि विप्रतिपन्नं प्रति प्रथमत एव शरीरादिभिन्नस्तत्प्रतिपादयितुं न शक्यत इत्यतः प्रमाणां-
तरं दर्शयति। करणमिति। वास्यादीनां छिदाकरणानां कर्तारमंतरेण फलानुपधानं दृष्टं एवं चक्षुरादीनां ज्ञानकरणानां फलोपधा-
नमपि विनोपपद्यत इत्यतिरिक्तः कर्ता कल्प्यते। ननु शरीरस्यैव कर्तृत्वमस्त्वत आह। शरीरस्येति। ननु चैतन्यं ज्ञानादिकमेव मृत-
मनोत्वन्मृतेऽधर्मतश शरीराणामपि तदभावे का क्षतिः प्राणाभावेन ज्ञानाभावस्य सिद्धेरिति चेन्न शरीरस्य चैतन्ये बाल्ये विलोकि-
तस्य स्थविरे स्मरणानुपपत्तेः। शरीराणामवयवोपचयापचयैरुत्पादविनाशशालित्वात्। न च पूर्वशरीरोत्पन्नसंस्कारेण द्वि-
यशरीरे संस्कार उत्पाद्यत इति वाच्यम्५ एवं शरीरस्य चैतन्ये बालकस्य स्तन्यपाने प्रवृत्तिर्न स्यात्। इष्टसाधनताज्ञानस्य तद्धेतुत्वात्।
५ अनंतसंस्कारकल्पनागौरवात्।४७

२३

तदानीमिष्टसाधनत्वानुभावकत्वाभावात्। जन्मांतरानुभूतेष्टसाधनत्वस्य तदानीं स्मरणादेव प्रवृ-
त्तिः। न च जन्मांतरानुभूतमन्यदपि स्मर्येतेति वाच्यं। उद्बोधकाभावात्। संस्कारस्तोशाद्धो॥ अत्र त्वना-
यत्या जीवनादृष्टमेवोद्बोधकं कल्प्यते। इत्थं च संसारस्यानादितया आत्मनोऽनादित्वसिद्धौ अनादिभा-
वस्य नाशासंभवान्नित्यत्वं संभवतीति बोध्यं। ननु चक्षुरादीनामेव ज्ञानादौ करणत्वं कर्तृत्वं चास्तु अवि-
रोधे साधकाभावात् अत आह। तथात्वं चेदिति। तथात्वं चैतन्यं। उपघाते विनाशे सति। अर्थाच्च-
क्षुरादीनामेव। नैकमिति। पूर्वं चक्षुषा साक्षात्कृतानां चक्षुषोऽभावे स्मरणं न स्यात्। अनुभवितुरभा-
वात्। अन्येनानुभूतस्यान्येन स्मरणासंभवादनुभवस्मरणयोः सामानाधिकरण्येन कार्यकारण-

॥२४॥

भावादिति भावः। ननु चक्षुरादीनां चैतन्यं मास्तु मनसस्तु नित्यस्य चैतन्यं स्यादत आह। मनोपीति म
नोपि चेतनमित्यर्थः। ज्ञानादीति। मनसोऽणुत्वात् प्रत्यक्षे च महत्त्वस्य हेतुत्वान्मानसज्ञानसुखादिप्रत्यक्षत
त्प्रत्यक्षानुपपत्तेरित्यर्थः। यथा च मनसोऽणुत्वं तथाग्रे वक्ष्यते। नन्वस्तु विज्ञानमेवात्मा। तस्य स्वतः प्रकाश
रूपत्वाच्चेतनत्वं ज्ञानसुखादिकं तस्यैवाकारविशेषः। तस्यापि भावत्वादेव क्षणिकत्वं। पूर्वपूर्वविज्ञान
स्योत्तरोत्तरविज्ञानहेतुत्वात्। सुषुप्तावप्यालयविज्ञानधारा निराबाधैव। मृगमदवासनाया वसन इव
पूर्वपूर्वविज्ञानजनितसंस्कारस्य उत्तरोत्तरविज्ञाने संक्रान्तत्वान्नानुपपत्तिः स्मरणादेरिति चेन्न। तस्य ज्ञ
नाद्विषयत्वे सार्वज्ञत्वापत्तेः यत्किंचिद्विषयत्वे विनिगमकाभावात्। सुषुप्तावपि विषयावश्यं प्रसंग

विज्ञानं द्विविधं प्रवृत्तिविज्ञानं आलयविज्ञानं च अयं घट इत्याकारकं प्रवृत्तिविज्ञानं

स २ यत्तत्सर्वं ... मिति

॥२४॥

त्। तदानीं निराकारा चित्संततिरनुवर्तते इति चेत्। न। तस्याः प्रकाशत्वे प्रमाणाभावात्। अन्यथा घटादी
नामपि ज्ञानत्वापत्तिः। न चेष्टापत्तिः विज्ञानव्यतिरिक्तस्य वस्तुनोऽभावादिति वाच्यं। घटादेरनुभूयमानस्याप
लपितुमशक्यत्वात्। आकारविशेष एवायं विज्ञानस्येति चेत्। किमयमाकारोऽतिरिच्यते विज्ञानान्न वा। न हि सम
यातं ज्ञानव्यतिरिक्तेन नातिरिच्यते चेत्तर्हि समूहालंबने नीलाकारोऽपि पीताकारः स्यात्। स्वरूपतो विज्ञा
नस्याविशेषात्। अपोहरूपो नीलत्वादिर्विज्ञानधर्म इति चेन्न। नीलत्वादीनां विरुद्धानामेकस्मि
न्समावेशात्। इतरथा विशेषावधारणास्यैव दुरुपपादत्वात्। न वा वासनासंक्रमः संभवति
। मातृपुत्रयोरपि वासनासंक्रमप्रसंगात्। न चोपादानोपादेयभावो नियामक इति वाच्यं। वासनाया

वि

अतद्व्यावृत्तिः ३

॥२५॥ संक्रमाभावात् । न तरस्मिन्नुत्पत्तिरेव संक्रम इति चेन्न । तदुत्पादकाभावात् ॥ चित्तामेवोत्पादकत्वे तदानंतप्र संस्कारा
संगः । क्षणिकविज्ञानेष्वतिशयविशेषः कल्प्यत इति चेन्न । मानाभावात् । कल्पनागौरवात् । एतेनक्ष
णिकशरीरेष्वेव चैतन्यमपि प्रत्युक्तं । गौरवादतिशये मानाभावाच्च । बीजादावपि सहकारिसमवधाना
प सम्वधानाभ्यामेवोपत्तेः कुर्वद्रूपत्वाकल्पनात् । अस्तु तर्हि क्षणिकविज्ञाने गौरवान्नित्यविज्ञानमेवात्मा र
। अविनाशी वा अरेऽयमात्मा सत्यं ज्ञानमनंतं ब्रह्मेत्यादिश्रुतेश्चेति चेन्न । तस्यासविषयत्वासंभ
वस्यादर्शितत्वान्निर्विषयस्य ज्ञानत्वेमानाभावात् । सविषयस्यापानवुभवादतो ज्ञानभिन्नो नित्य आत्मे
तिसिद्धं । सत्यं ज्ञानमिति ब्रह्मपरं जीवेषु नोपयुज्यते । ज्ञाता ज्ञातृत्वशुक्लित्वासुखित्वादिभिर्जीवानां भेद ॥२५॥

सिद्धे सुतरामीश्वरभेदोऽन्यथा बंधमोक्षानुपपत्तेः ॥ यो हीश्वराभेदबोधकोवेदः सोपि तदभेदेन तदीयत्वं १ तत्त्वमसीत्याकारकः
प्रतिपादयन्नस्तीति ॥ अभेदभावनयैव यतितव्यमिति वदति ॥ अत एव सर्व एवात्मानः समर्पिता इति श्रूयते ॥
मोक्षदशायामज्ञाननिवृत्ताव भेदो जायत इत्यपि न । भेदस्य नित्यत्वेन नाशायोगात् ॥ भेदनाशेपि व्यक्तिद्वयं स्था
स्यत्येव । तच्च द्वित्वमपि नश्यतीति वाच्यम् ॥ तवनिर्द्धर्मके ब्रह्मणि शोत्पत्त्याभावेपि सत्यस्वरूपं तदिति वत् द्वि स४
त्वाभावेपि द्व्यात्मकोनाविन्त्यस्यापि सुवचत्वात् ॥ मिथ्याभावोऽधिकरणात्मकस्तत्र सत्यत्वमित्रेदे कत्वाभावोव्य ३ति
क्तिद्व्यात्मकोऽद्वित्वमित्यप्युच्यतां ॥ प्रत्येकमेकत्वेपि पृथिवीजलयोर्न गंधः इति वत् ॥ उभयं नैकमित्यस्य
ब्रह्मविद्ब्रह्मैव भवतिइति श्रुते सर्वजनसिद्धत्वात् ॥ योपि तदानीमभेदप्रतिपादक आगमः सोपि निर्दुःखत्वादिना साम्यं प्रतिपादयति । संपदा

धिक्येपुरोहितोयंराजासंवृत्तइतिवत्॥अतएवनिरंजनःपरमंसाम्यमुपैतीतिश्रूयते॥ईश्वरोपिनज्ञानसु
खात्माकिंतुज्ञानाद्याश्रयः॥नित्यंविज्ञानमानंदंब्रह्मेत्यादौविज्ञानपदेनज्ञानाश्रयएवोक्तः॥यःसर्वज्ञइत्याद्य
नुरोधात्॥आनंदमित्यपानंदवदित्यर्थः॥आनंदोपिदुःखाभावेउपचर्यते॥भाराद्यपगमेसुखीसंवृत्तोहमि
तिवत्॥अप्रस्तुतवातस्मिन्नानंदोनचसावानंदःअसुखमितिश्रुतेः॥नविद्यतेसुखमस्येतिकुतोनार्थइतिचेन्न
क्लिष्टकल्पनापत्तेः॥प्रकरणविरोधात्॥आनंदमित्यत्रमत्वर्थीयाच्प्रत्ययविरोधाच्चेतिसंक्षेपः॥एतेनप्रकृ
तिःकर्त्रीपुरुषःपुष्करपलाशवन्निर्लेपःकिंतुचेतनः॥कार्यकारणयोरभेदात्कार्यनाशेसतिकार्यरूपत
यानाशोनस्यादित्यकारणत्वंतस्य॥बुद्धिगतचैतन्याभिमानान्यथानुपपत्यातत्कल्पनं॥बुद्धिश्चप्रकृ

पुरुषःकर्तृत्वाभाववान्॰कारणत्वाभावात्॰पटवत्

तेःपरिणामःसैवमहत्तत्वमंतःकरणमित्युच्यते॥तत्सत्वासत्वाभ्यांपुरुषस्यसंसारापवर्गौ॥तस्याएवइंद्रिय
प्रणालिकयापरिणतिर्ज्ञानिरूपाघटादिनासंबंधः॥पुरुषेकर्तृत्वाभिमानोबुद्धौचैतन्याभिमानश्चभेदाग्र
हात्॥ममिदंकर्त्तव्यमितिमदंशःपुरुषोपरागोबुद्धेःस्वच्छतयातत्प्रतिबिंबादतात्विकः॥दर्पणस्येवमुखोपरागः॥
इदमितिविषयोपरागइंद्रियप्रणालिकयापरिणतिभेदस्तात्विकः॥श्वासाभिहतदर्पणस्येवमलिनिमा॥
कर्त्तव्यमितिव्यापारांशः॥तेनीशत्रयवतीबुद्धिस्तत्परिणामेनज्ञानेनपुरुषस्यातात्विकःसंबंधः॥दर्पण
मलिनिम्नेवमुखस्योपाधिच्छिद्रुच्यतेज्ञानवत्सुखदुःखेच्छाद्वेषप्रयत्नधर्माअपिबुद्धेरेव॥कृतिसामाना
धिकरण्येनप्रतीतिः॥नचबुद्धिश्चेतनापरिणामित्वादितिमतमपास्तं॥कृत्यदृष्टभोगानामिवचैतन्यस्या

पिसामानाधिकरण्येऽपि प्रतीतेस्तद्भिन्नमानाभावात् । चेतनोऽहं करोमीति प्रतीतेः ॥ चैतन्यांशे भ्रम इति
चेत् कृत्यंशेऽपि किं नेष्यते ॥ अन्यथा बुद्धेर्नित्यत्वे मोक्षाभावोऽनित्यत्वे तत्पूर्वमसंसारापत्तिः ॥
अचेतनायाः प्रकृतेः कार्यत्वाद्बुद्धेरचेतनत्वं कार्यकारणयोस्तादात्म्यादिति चेन्न । असिद्धेः । अ
चेतनायाः कृतित्वे मानाभावात् । वीतरागजन्मादर्शनादनादित्वमनादेर्नाशासंभवान्नित्यत्वं किंत
त्प्रकृत्यादिकल्पनेन । न च प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहंकारविमूढात्मा कर्ताहमिति
मन्यत इत्यनेन विरोध इति वाच्यम् । प्रकृतेरदृष्टस्य गुणैरदृष्टजन्येच्छादिभिः कर्ताहमेवेत्यस्यानर्थत्वा
त् । तत्रैवं सति कर्तारमात्मानं केवलं तु यः इत्यादि वदता भगवता प्रकटीकृतोऽयमुपरिष्टादाशय इति संक्षे
पः । धर्माधर्मेति । आत्मेत्यनुषज्यते । शरीरस्य तादात्म्ये देहान्तरकृतकर्मणां देहान्तरे भोगानुपपत्तेः । अध्यक्ष

वात्तिनत्वन्यथा । अहं जाने करोमीति प्रतीतेः । प्रवृत्तीति । आत्मा परदेहादौ प्रवृत्त्यादिना अनुमीयते । प्रवृत्तिरत्र चेष्टा
ह्यानिच्छाप्रयत्नादीनां देहे भावस्योक्तप्रायत्वाच्चेष्टायाः प्रयत्नसाध्यत्वाच्चेष्टया प्रयत्नवानात्मानुमीयत इ
ति भावः । तत्र दृष्टान्तमाह रथेति । यद्यपि रथकर्म चेष्टा न भवति तथापि तेन कर्मणा सारथिर्यथानुमीयते तथा
चेष्टात्मकेन कर्मणा परात्मापीति भावः । अहंकारस्येति । अहंकारोऽहमिति प्रत्ययस्तस्याश्रयो विषयश्चात्मा न श
रीरादिरिति । मनोवृत्तीति । मनोभिन्नेन्द्रियजन्य प्रत्यक्षाविषयो मानसप्रत्यक्षविषयश्चेत्यर्थः । रूपाद्यभावेनेन्द्रि
यान्तरायोग्यत्वात् । विभुरिति । विभुत्वं परममहत्परिमाणवत्त्वं तच्च पूर्वमुक्तमपि स्पष्टार्थमुक्तं । बुद्ध्यादीति । बु
द्धिसुखदुःखेच्छाद्वेषप्रयत्नदशगुणाः पूर्वमुक्ता वेदितव्याः । अत्रैव प्रसंगाद्बुद्धेः कतिपयप्रपंचं दर्शयति । बु

॥२८॥

वि द्विस्त्वद्विष्टेति । द्वैविध्यं व्युत्पादयति । अनुभूतिरिति । प्रत्यक्षमिति । इंद्रियजन्यं ज्ञानं प्रत्यक्षं । यद्यपि मितौ रूपेंद्रियजन्यं तत्र
सर्वमेव ज्ञानं तथापि इंद्रियत्वेन रूपेणेंद्रियाणां यत्र ज्ञाने करणत्वं तत्प्रत्यक्षमिति विवक्षितं । ईश्वरप्रत्यक्षं तु न
लक्ष्यं इंद्रियार्थसन्निकर्षोत्पन्नमिति सूत्रे तथैवोक्तत्वात् । अथवा ज्ञानाकरणकं ज्ञानं प्रत्यक्षं । अनुमितौ व्या
ज्ञान प्तिज्ञानस्योपमितौ सादृश्यज्ञानस्य शाब्दबोधे पदस्य स्मरणे अनुभवस्य करणत्वान्न तत्रातिव्याप्तिः । इदं लक्ष
णमीश्वरप्रत्यक्षसाधारणं । परामर्शजन्यं ज्ञानमनुमितिः । यद्यपि परामर्शप्रत्यक्षादिकं परामर्शजन्यं तथापि प
रामर्शजन्यं हेत्वविषयकं ज्ञानमनुमितिः । न च कादाचित्कहेत्वविषयकानुमितावव्याप्तिरिति वाच्यं । ॥२८॥
तादृशज्ञानत्ववृत्त्यनुभवत्वव्याप्यजातिमत्त्वस्य विवक्षितत्वात् । अथवा व्याप्तिज्ञान करणकं ज्ञानमनुमितिः ।

प्रत्यक्षाणि विनजतेर

एवं सादृश्यज्ञानकरणकं ज्ञानमुपमितिः । पदज्ञानकरणकं ज्ञानं शाब्दबोधः । वस्तुतो यत्किंचिदनुमितिव्यक्तिमादाय
तद्व्यक्तिवृत्त्यनुमितिपरवृत्तिजातिमत्त्वं प्रत्यक्षत्वादिकं वाच्यमिति । घ्राणजादीति । घ्राणजं रासनं चाक्षुषं स्पार्शनं
श्रोत्रं मानसमिति षड्विधं प्रत्यक्षं । न चेश्वरप्रत्यक्षस्याविभजनान्न्यूनत्वं । जन्यप्रत्यक्षस्यैव निरूपणीयत्वात् । उक्त
सूत्रानुसारात् । गोचर इति । ग्राह्य इत्यर्थः । गंधत्वादीत्यादिपदेन सुरभित्वादिपरिग्रहः । गंधस्य प्रत्यक्षत्वात्
तद्वृत्तिजातिरपि प्रत्यक्षा । गंधाश्रयग्रहणे तु घ्राणस्य न सामर्थ्यमिति बोध्यं । तथा रस इति । रसत्वादिसहित इत्य
र्थः । तथा शब्दत्वादिसहितः । गंधो रसश्चोद्भूतो बोध्यः । उद्भूतरूपमिति । ग्रीष्मोष्मादावनुद्भूतरूपमिति न तत्प्रत्यक्षं
। तद्वृत्ति । उद्भूतरूपवंतीति । योग्येति । पृथक्त्वादिकानामपि योग्यव्यक्तिवृत्तित्वं बोध्यं । तादृशाः । योग्यव्यक्तिवृत्तित्वं इत्यर्थः [redacted]
तद्व्यक्तिवृत्तिप्रत्यक्षवृत्तिजातिमत्त्वमनुमितित्वं । एवं यत्किंचित्प्रत्यक्षादिकमादाय र

॥७९॥

चक्षुर्योग्यत्वमेव कथं तत्राह । उद्भूतेति । आलोकसंयोग उद्भूतरूपं च चाक्षुषप्रत्यक्षे कारणं। तत्र द्रव्यचाक्षुषप्रतीतौ
समवायसंबंधेन कारणत्वं द्रव्यसमवेतप्रत्यक्षे स्वाश्रयसमवायसंबंधेन द्रव्यसमवेतसमवेतस्य रूपत्वादेः प्रत्यक्षे स्वा
श्रयसमवेतसमवायसंबंधेनेति । उद्भूतस्पर्शवदिति । उद्भूतस्पर्शवद्द्रव्यं त्वचो गोचरः सोपि उद्भूतस्पर्शोपि स्प
र्शत्वादिसहितः । रूपान्यदिति रूपभिन्नं रूपत्वादिभिन्नं च चक्षुर्योग्यं तत् त्वगिंद्रियस्यापि योग्यं । तथा च
पृथक्त्वसंख्यादयो ये चक्षुर्ग्राह्यगुणा उक्ताः । एवं क्रियाः एवं जातयो योग्यवृत्तयश्च त्वचो ग्राह्या इति । अत्रापि ॥२९॥
त्वगिंद्रियजन्येपि द्रव्यप्रत्यक्षे रूपं कारणं तथा च बहिरिंद्रियजन्यद्रव्यप्रत्यक्षे रूपं कारणमिति । तन्नास्ति । बहि
रिंद्रियजन्यद्रव्यप्रत्यक्षे न रूपं कारणं । प्रमाणाभावात् । किंतु चाक्षुषप्रत्यक्षे रूपं । स्पार्शनप्रत्यक्षे च स्पर्शः का

चो ६

रणं । अन्वयव्यतिरेकात् । बहिरिंद्रियजन्यद्रव्यप्रत्यक्षमात्रे किं कारणमिति चेन्न किंचित् । आत्मावृत्तिशब्दभि
न्नविशेषगुणवत्त्वं वा प्रयोजकमस्तु । उद्भूतरूपस्य कारणत्वे लाघवमिति चेन्न । वायोस्त्वगिंद्रियेणाग्रहण
प्रसंगात् । इष्टापत्तिरिति चेन्न । उद्भूतस्पार्शएव लाघवात्कारणमस्तु । प्रभाया अप्रत्यक्षत्वे त्विष्टापत्तिरि
वत् त्यत्र किं तस्यात् । तस्मात् प्रभां पश्यामीति वायुं स्पृशामीति प्रत्ययसत्त्वाद्द्वयोरपि प्रत्यक्षं भवत्येव । बहिरिंद्रियद्र
व्यप्रत्यक्षमात्रे न तु रूपस्य न वा स्पर्शस्य हेतुत्वं । वायुप्रभयोरैक्यं गृह्यत एव । क्वचिद्द्वित्वादिकमपि । क्वचित्सं
ख्यापरिमाणाद्यग्रहो दोषादित्याहुः । संयोग इति । त्वङ्मनःसंयोगो ज्ञानमात्रे कारणमित्यर्थः । किं तत्र प्रमा
णं । सुषुप्तिकाले त्वचं त्यक्त्वा पुरीतति वर्त्तमानेन मनसा ज्ञानाजननमिति । तत्सुषुप्तिकाले किं ज्ञानं भवि
ष्यति । अनुभवरूपं स्मरणं वा ॥ नाद्यः अनुभवसामग्र्य भावात् । तथा हि । प्रत्यक्षे चक्षुरादीनां स

॥३०॥

हमनः संयोगस्य हेतुत्वात् तदभावादेव न चाक्षुषादिप्रत्यक्षं । ज्ञानादेरप्यभावादेव न मानसप्रत्यक्षं । ज्ञानाद्यभा
वे चात्मनोऽपि न प्रत्यक्षं । व्याप्तिज्ञानाभावादेव नानुमितिः । सादृश्यज्ञानाभावान्नोपमितिः । पदज्ञानाभावान्न शा
ब्दबोधः । उत्पन्नभवस्यामप्यभावान्नानुभवः । उद्बोधकाभावाच्च न स्मरणमिति [redacted] मेवं । सुषुप्तिप्रा
क्कालोत्पन्नेच्छादिव्यक्तेरात्मसंबंधेन मनसश्च प्रत्यक्षप्रसंगात् । तदंतरिंद्रियत्वे मानाभावात् । सुषुप्तिप्राक्का
लेति निर्विकल्पकमेव नियमेन जायते सुषुप्तावपि प्रमाणाभावात् । अथ ज्ञानमात्रे यदि त्वङ्मनःसंयोग
स्य कारणत्वं तदा रासनचाक्षुषादिप्रत्यक्षकालेऽत्वाचप्रत्यक्षं स्यात् । विषयसंयोगत्वङ्मनःसंयोगस्य स ॥१०॥
चसत्वात् । परस्परप्रतिबंधादेकमपि ज्ञानं न स्यादिति । अत्र केचित् । पूर्वोक्तियुक्त्या त्वङ्मनसोर्योगस्य हेतु
त्वसिद्धेश्चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबंधकत्वमनुत्तर्वतीतु कल्प्यत इति । अन्ये तु सुषुप्त्यनु

यंति १

रोधात्त्वर्ममनःसंयोगस्य ज्ञाने हेतुत्वं कल्प्यते । चाक्षुषादिप्रत्यक्षकाले त्वङ्मनःसंयोगाभावान्न त्वाचप्रत्यक्षमिति । मनो
ग्राह्यमिति । मनोजन्यप्रत्यक्षविषय इत्यर्थः । मतिर्ज्ञानं कृतिः प्रयत्नः । एवं सुखदुःखत्वादिकमपि मनोग्राह्यं । एव मात्म
पि मनोग्राह्यः । किंतु मनोमात्रस्य गोचर इत्यनेन पूर्वमुक्तत्वादत्र नोक्तम् । ज्ञानं यदिति । चक्षुःसंयोगानंतरं घट
इत्याकारकं घटत्वादिविशिष्टं ज्ञानं न संभवति पूर्वं विशेषणस्य घटत्वादेर्ज्ञानाभावात् विशिष्टबुद्धौ विशेषणज्ञान
स्य कारणत्वात् । तथा च प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव निर्विकल्पकं । तच्च न प्रत्यक्षं
तथाहि । वैशिष्ट्यानवगाहिज्ञानस्य प्रत्यक्षं न भवति घटमहं जानामीति प्रत्ययात् । तत्रात्मनि ज्ञानं प्रकारीभूय भा
सते । ज्ञाने घटस्तत्र घटत्वं । प्रकारो यः स एव विशेषणमित्युच्यते । विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकं

सि॰मु॰ मित्तु चेन्न। विशेषणतावच्छेदकप्रकारकं ज्ञानं विशिष्टवैशिष्ट्यावगाहिज्ञाने कारणं॥ निर्विकल्प
३१ के च घटत्वादिकं न प्रकारस्तेन घटत्वादिविशिष्टघटादिवैशिष्ट्यभानं ज्ञानेन न संभवति। घटत्वा
द्यप्रकारकं घटादिविशिष्टज्ञानं न संभवति। अतींद्रियपदार्थज्ञानस्य किंचिद्धर्मप्रकारकत्वनिय
मात्। महत्त्वं षड्विध इति। द्रव्यप्रत्यक्षे महत्त्वं समवायसंबंधेन द्रव्यसमवेतानां गुणकर्मसा
मान्यानां प्रत्यक्षे स्वाश्रयसमवायसंबंधेन। द्रव्यसमवेतसमवेतानां गुणत्वकर्मत्वादीनां प्रत्य
क्षे स्वाश्रयसमवेतसमवायसंबंधेन कारणमिति। इंद्रियमिति। अत्रापि षड्विध इत्यनुषज्यते। इंद्रि
यत्वं तु न जातिः पृथिवीत्वादिना सांकर्यात्। इंद्रियत्वं च शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वं ३१

रणापसत्यंतं उद्भूतविशेषगुणस्य श्रोत्रे सत्त्वात् शब्देतरेति। विशेषगुणस्यात्मादेश्चक्षुरादावपिस
त्वादुद्भूतेति उद्भूतत्वं न जातिः शुक्लत्वादिना संकरात् न च शुक्लत्वादिव्याप्यं नानैवोद्भूतत्वमिति वाच्यं उद्भू
तरूपत्वादिना चाक्षुषादौ जनकत्वानुपपत्तेः किंतु शुक्लत्वादिव्याप्यमनुद्भूतत्वं नाना तदभावकूट
श्चोद्भूतत्वं। त्वक्संयोगादावपि। तथा च शब्देतरोद्भूत गुणः संयोगादिश्चक्षुरादावस्त्यतो विशे
षेति। कालादिवारणाय विशेष्यदलं। इंद्रियावय वविषयसंयोगस्यापि प्राचां मते प्रत्यक्षजनक
त्वात् इंद्रियावयववारणाय कालादौ रूपाभावप्रत्यक्षे सन्निकर्षघटकतया कारणीभूतच
क्षुःसंयोगाश्रयस्य कालादेर्वारणाय मनःपदं ज्ञानकारणमित्यपि तद्वारणाय। कारणमि

द्रव्यसमवेतसमवेतचाक्षुषंप्रतिचक्षुःसंयुक्त ४

॥३५॥ ति। असाधारणं कारणं करणं। असाधारणत्वं व्यापारवत्त्वं। व्यापारः सन्निकर्षः। षड्विधसन्निकर्षमुदाह
रणद्वारा दर्शयति। द्रव्यग्रहइति। द्रव्यप्रत्यक्षमिंद्रियसंयोगजन्यं। द्रव्यसमवेतप्रत्यक्षमिंद्रियसंयुक्तस
मवायजन्यं। एवमग्रेपि वक्तव्यं तत्र द्रव्यचाक्षुषंप्रतिचक्षुःसंयोगः कारणं। द्रव्यसमवेतचाक्षुषंप्रति
समवायः कारणं ४ चक्षुःसंयुक्तसमवेतसमवायः। एवमन्यत्रापि विशेषेव कार्यकारणभावः परंतु पृथिवीपरमाणुनीले
नीलत्वं पृथिवीपरमाणौ च पृथिवीत्वं चाक्षुषं कथं न गृह्यते तत्र परंपरयोद्भूतरूपसंबंधस्य महत्त्व सं
बंधस्य चाविद्यमानत्वात्। तथाहि नीलत्वजातिरेकैव घटनीले परमाणुनीले च वर्त्तते। तथा च महत्त्व
संबंधी घटनीलमादाय वर्त्तते। रूपसंबंधस्तूभयमादायैव वर्त्तते। एवं पृथिवीत्वेपि घटादिकमादाय म ॥३५॥

द्रव्यसमवेतसमवेतस्पार्शनप्रत्यक्षेत्वक्संयुक्तसमवेतसमवायः ७

हत्त्वसंबंधो बोध्यः। एवं वायौ तदीयस्पर्शादौ च सत्तायाश्चाक्षुषप्रत्यक्षं स्यात्। तस्मादुद्भूतरूपावच्छिन्नमहत्त्वावच्छि
न्नचक्षुःसंयुक्तसमवायस्य द्रव्यसमवेतप्रत्यक्षे तादृशचक्षुःसंयुक्तसमवेतसमवायस्य द्रव्यसमवेतसम
वेतप्रत्यक्षे कारणत्वं वाच्यं। द्व्यणुके च परमाणुनीलादौ न नीलत्वादिग्रहः परमाणुचक्षुःसंयोगस्य महत्त्वा
वच्छिन्नत्वाभावात्। एवं वाय्वादौ न सत्तादिचाक्षुषं। तत्र चक्षुःसंयोगस्य रूपानवच्छिन्नत्वात्। एवं यत्र घट
स्य पृष्ठावच्छेदेनालोकसंयोगश्चक्षुःसंयोगस्त्वग्रावच्छेदेन तत्र घटप्रत्यक्षाभावादालोकसंयोगावच्छिन्न
त्वं चक्षुःसंयोगे विशेषणं बोध्यं। एवं द्रव्यस्पार्शनप्रत्यक्षे त्वक्संयोगः कारणं। द्रव्यसमवेतस्पार्शन
प्रत्यक्षे त्वक्संयुक्तसमवायः। अत्रापि महत्त्वावच्छिन्नत्वं उद्भूतस्पर्शावच्छिन्नत्वं च पूर्ववदेव बोध्यं।

॥३३॥

एवं गंधप्रत्यक्षे घ्राणसंयुक्तसमवायः । रसप्रत्यक्षे रसनसंयुक्तसमवायः । गंधसमवेतस्य घ्राणजप्रत्यक्षे घ्रा
णसंयुक्तसमवेतसमवायः । रससमवेतस्य रासनप्रत्यक्षे रसनसंयुक्तसमवेतसमवायः कारणं । शब्दप्रत्य
स्प क्षे श्रोत्रावच्छिन्नसमवायः । शब्दसमवेतं श्रावणप्रत्यक्षे श्रोत्रावच्छिन्नसमवेतसमवायः । अत्र सर्वत्र प्रत्यक्षं
लौकिकं बोध्यं । वक्ष्यमाणमलौकिकप्रत्यक्षं इंद्रियसंयोगादिकं विनापि भवति । एवमात्मप्रत्यक्षे म
नःसंयोगः । आत्मसमवेतमानसप्रत्यक्षे मनःसंयुक्तसमवायः कारणं । आत्मसमवेतसमवेतप्रत्यक्षे म
नःसंयुक्तसमवेतसमवायः कारणं । अभावप्रत्यक्षे समवायप्रत्यक्षे च इंद्रियसंबद्धविशेषणता हेतुः ।
वैशेषिकनये तु समवायो न प्रत्यक्षः । यदि स्यादिति । अत्र तावत्प्रत्यक्षे योग्यानुपलब्धिः कारणं । तथा ॥३३॥

हि भूतले घटादिसत्वे घटाभावादिकं न ज्ञायते । तेनाभावोपलंभे प्रतियोग्युपलंभाभावः कारणं । तत्र योग्य
तापि अपेक्षिता सा च प्रतियोगिसत्वप्रसंजनप्रसंजितप्रतियोगिकत्वरूपा । तदर्थश्च प्रतियोगिनो घटादेः
सत्वप्रसक्त्या प्रसंजितः उपलंभरूपः प्रतियोगी यस्य स अनुपलंभाभावोऽभावप्रत्यक्षे हेतुः । तथाहि । यत्रालो
कसंयोगादिकं वर्त्तते तत्र यद्यत्र घटः स्यात्तर्हि उपलभ्येतेत्यापादयितुं शक्यते तत्र घटाभावादि प्रत्यक्षे
भवति । अंधकारे नापादयितुं शक्यते । तेन घटाभावादेरंधकारे चाक्षुषप्रत्यक्षं न । स्पार्शनप्रत्यक्षं तु भव
त्येव । आलोकसंयोगं विनापि स्पार्शनप्रत्यक्षस्यापादयितुं शक्यत्वात् । गुरुत्वादिकं यद्योग्यं तदभाव
स्तु न प्रत्यक्षः । तत्र गुरुत्वादिप्रत्यक्षस्यापादयितुमशक्यत्वात् । वायौ उद्भूतरूपाभावः । पाषाणे सौ

॥३४॥ रूपाभावः। गुडे तिक्ताभावः। वह्नावनुष्णत्वाभावः श्रोत्रे शब्दाभावः। आत्मनि सुखाद्यभावः। एवमादयस्तत्त-
दिंद्रियैर्गृह्यंते। तत्र तत्तत्प्रत्यक्षस्योत्पादयितुं शक्यत्वात्। संसर्गाभावप्रत्यक्षे प्रतियोगिनो योग्यता। अन्योन्या-
भावप्रत्यक्षे चाधिकरणयोग्यत्वमपेक्षितं। अत एव स्तंभादौ पिशाचादिभेदोपि चक्षुषा गृह्यते। एवं प्रत्यक्षं
लौकिकालौकिकभेदेन द्विविधं। तत्र लौकिकप्रत्यक्षे षोढा सन्निकर्षा उक्ताः। अलौकिकसन्निकर्षानिदा-
नीं वदति। अलौकिकस्त्विति। व्यापारः सन्निकर्षः। सामान्यलक्षणेति। सामान्यं लक्षणं यस्येत्यर्थः। तत्र
लक्षणपदेन यदि स्वरूपमुच्यते तदा सामान्यस्वरूपं प्रत्यासत्तिरित्यर्थो लभ्यते। तत्रेंद्रियसंबद्धविशेष्यक-
ज्ञाने प्रकारीभूतं बोध्यं। तथाहि। यत्रेंद्रियसंयुक्तो धूमादिस्तद्विशेष्यकं धूम इति ज्ञानं तत्र ज्ञाने धूमत्वं प्रका- ॥३४॥

यत्र जातं

रस्तत्र धूमत्वेन सन्निकर्षेण धूमा इत्येवरूपं सकलधूमविषयकं ज्ञानं जायते। अत्र यदींद्रियसंबद्धमित्येवोच्यते
तदा यत्र धूलीपटले धूम इति ज्ञानं तत्र धूमत्वेन सन्निकर्षेण सकलधूमविषयकं ज्ञानं न स्यात्। तत्र धूमत्वे-
न सहेंद्रियसंबंधाभावात्। मन्मते तु इंद्रियसंबद्धं धूलीपटलं तद्विशेष्यकं धूम इति ज्ञानं तत्र प्रका-
रीभूतं धूमत्वं प्रत्यासत्तिः। इंद्रियसंबंधश्चालौकिको ग्राह्यः। इदं च बहिरिंद्रियस्थले। मानसस्थले
तु ज्ञानप्रकारीभूतं सामान्यं सन्निकर्षः। परंतु समानानां भावः सामान्यं तच्च क्वचिन्नित्यं धूमत्वादि।
क्वचिच्चानित्यं घटादि। यत्रैको घटः संयोगसंबंधेन भूतले समवायसंबंधेन कपाले वा ज्ञात-
स्तदनंतरं सर्वेषां तद्घटवतां भूतलादीनां कपालानां वा ज्ञानं भवति। तत्रेदं बोध्यं। परंतु सामान्य

॥३५॥ येन संबंधेन ज्ञायते तेन संबंधेनाधिकरणानां प्रत्यासत्तिः । किंच यद्घटनाशानंतरं तद्घटवत्तः
स्मरणं जातं तत्र सर्वेषां तद्घटवत्तां ज्ञानं न स्यात् । सामान्यस्य तदानीमभावात् । किंचेंद्रिय
संबद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इंद्रियसंबंधं विनापि तादृशज्ञानप्रकारी
भूतसामान्यसत्वात्सकलघटविषयकं ज्ञानं कुतो न जायते तस्मात्सामान्यज्ञानं प्रत्यासत्ति न
तु सामान्यमित्याह । आसत्तिरिति । प्रत्यासत्तिरित्यर्थः । सामान्यज्ञानमिति । तथाच सामान्यं
लक्षणमित्यत्र लक्षणशब्दस्य विषयोऽर्थः । तेन सामान्यविषयकं ज्ञानं प्रत्यासत्तिरिति लभ्यते ॥३५॥
ननु चक्षुःसंयोगादिकं विनापि सामान्यज्ञानं यत्र वर्त्तते तत्र सकलघटादीनां प्रत्यक्षं स्याद त

आह । तदिंद्रियजेति । अस्यार्थः । यदा बहिरिंद्रियेण सामान्यलक्षणया सकलघटादीनां प्रत्यक्ष
ज्ञानं जननीयं तदा यत्किंचिद्धर्मिणि तत्सामान्यस्य तदिंद्रियजन्यज्ञानसामग्र्यपेक्षिता । साच सा
मग्री चक्षुःसंयोगालोकसंयोगादिकं । तेनांधकारादौ चक्षुरादिना तादृशज्ञानं न जायते । न त्व
ज्ञानलक्षणप्रत्यासत्तिर्ज्ञानरूपा यदि सामान्यलक्षणापि ज्ञानरूपा तदा तयोर्भेदो न स्यात् अत आह
। विषयीति । सामान्यज्ञानरूपा प्रत्यासत्तिर्हि तदाश्रयस्य ज्ञानं जनयति । ज्ञानलक्षणाप्रत्यासत्तिस्तु
यद्विषयकं ज्ञानं तस्यैव प्रत्यासत्तिरिति । अत्रायमर्थः प्रत्यक्षे सन्निकर्षं विना भानं न संभवति ।
धूमत्वेन सकलधूमानां वह्नित्वेन सकलवह्नीनां ज्ञानं कथं भवति तदर्थं सामान्यलक्षणा स्वीक्रियते
सामान्यलक्षणां विना

॥३६॥ ।न च सकलवह्निधूमभानाभावेकाक्षतिरिति वाच्यं। प्रत्यक्षधूमेवह्निसंबंधस्य गृहीतत्वादन्यधूमस्य चा
नुपस्थितत्वात् धूमो वह्निव्याप्यो न वेति संशयानुपपत्तेः। मन्मते तु सामान्यलक्षणया सकलधूमोपस्थि
तौ कालांतरीयदेशांतरीयधूमे वह्निव्याप्यत्वसंदेहः संभवति न च सामान्यलक्षणास्वीकारे प्रमेयत्वे
न सकलप्रमेयज्ञाने जाते सार्वज्ञ्यापत्तिरिति वाच्यं प्रमेयत्वेन सकलज्ञाने जातेपि विशिष्य सकलपदार्था
नामज्ञातत्वेन सार्वज्ञ्याभावात् एवं ज्ञानलक्षणास्वीकारे सुरभि चंदनमिति सौरभस्य भानं कथं स्यात् द्य
यपि द्यपि सामान्यलक्षणया सौरभस्य ज्ञानं संभवति तथापि सौरभत्वस्य ज्ञानं ज्ञानलक्षणया एवं धूमत्वे ॥३६॥
ल न धूलीपटलं पश्यतां तत्र धूलीपटस्यानुव्यवसाये भानं ज्ञानलक्षणया [redacted]

योगजइति। योगाभ्यासजनितो धर्मविशेषः श्रुतिपुराणादिप्रमाणकइत्यर्थः।१

इतिप्रत्यक्षं

योगिनो द्विविधा युक्ता युंजानाश्च अतो योगजधर्मस्यापि द्वैविध्यं। युक्तस्य तावद्योगजधर्मसहाये
न मनसा काशपरमाण्वादिनिखिलपदार्थगोचरं ज्ञानं सर्वदैव भवितुमर्हति। द्वितीयस्य चिंता वि
शेषोपि सहकारीति। अनुमितिं व्युत्पादयति ॥ व्यापारस्त्विति । अनुमायां अनुमितौ। व्याप्तिज्ञा
नं करणं व्यापारः परामर्शः। तथाहि। येन पुरुषेण महानसादौ धूमे वह्निव्याप्तिर्गृहीता पश्चा
च्च स एव पुरुषः क्वचित्पर्वतादौ अविच्छिन्नमूलां धूमलेखां पश्यति तदनंतरं च धूमो वह्निव्याप्य इत्येवं
रूपं व्याप्तिस्मरणं तस्य भवति पश्चाच्च वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं भवति स एव परामर्श इ
त्युच्यते। तदनंतरं पर्वतो वह्निमानिति ज्ञानं जायते तदेवानुमितिः। तत्र प्राचीना वदंति। व्याप्यत्वे

त्वे

नज्ञायमानं लिंगं अनुमितिकरणं तद्दूषयति । ज्ञायमानं लिंगं तु करणं नहि । लिंगस्यानुमित्यकरणत्वेयु
॥३७॥ क्तिमाह । अनागतादीति । यद्यनुमितौ लिंगं करणं स्यात्तदानागतेन विनष्टेन वा लिंगेनानुमितिर्न स्या
मिति त् । अनुकरणस्य लिंगस्य तदानीं अभावादिति । व्याप्तस्य पक्षवृत्तित्वधीः परामर्श उच्यते । व्याप्तिवि
शिष्टस्य पक्षेण सह वैशिष्ट्यावगाहि ज्ञानं अनुमितौ जनकं तच्च व्याप्यः पक्षे इति ज्ञानं पक्षो व्याप्यवा
निति ज्ञानं वा । अनुमितिस्तु पक्षे व्याप्यज्ञानात्पक्षे साध्यं इत्याकारिका पक्षो व्याप्यवानिति ज्ञानात्
पक्षः साध्यवानिति । द्विविधादपि परामर्शात्पक्षः साध्यवानित्येवानुमितिरित्यन्ये । ननु वह्निव्या ॥३७॥
प्यधूमवान्पर्वत इति ज्ञानं विनापि यत्र पर्वतो धूमवानिति प्रत्यक्षं ततो धूमो वह्निव्याप्य इति स्मर

णं तत्र ज्ञानद्वयादनुमितिदर्शनात् । व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं न सर्वत्र कारणं किंतु व्याप्यत्वा
वच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेन कारणत्वं आवश्यकत्वात् । विशिष्टज्ञानकल्पने गौरवाच्चेति चेन्न
। व्याप्यत्वावच्छेदकाज्ञाने पि वह्निव्याप्यवानिति ज्ञानादनुमित्युत्पत्तेः । लाघवाच्च व्याप्तिप्रकारकपक्षधर्म
न ताज्ञानत्वेन हेतुत्वं । किंच धूमवान्पर्वत इति ज्ञानादनुमित्युत्पत्तिप्रसंगः व्याप्यत्वावच्छेदकीभूत धू
मत्वप्रकारकपक्षधर्मताज्ञानस्य सत्वात् । न च गृह्यमाणव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञा
नस्य हेतुत्वं वाच्यं चैत्रस्य व्याप्तिग्रहे मैत्रस्य पक्षधर्मताज्ञानादनुमित्यापत्तेः । यादृशपुरुषीयग
ह्यमाणव्याप्यवच्छेदकप्रकारकं तत्पुरुषीयपक्षधर्मताज्ञानं तत्पुरुषीयानुमितौ हेतुरित्युच्यते तदा

मन्मते तु समवायेन व्याप्तिप्रकारकपक्षधर्मताज्ञानं समवायेनानुमितिं जनयतीत्यर्थेनान्नं न कार्यकारणभावः १

॥३८॥ नं त्त कार्यकारणभावः। यदि तु व्याप्तिप्रकारकं ज्ञानं पक्षधर्मताज्ञानं च स्वतंत्रकारणमित्युच्यते
तदा कार्यकारणभावद्वयं वह्निव्याप्यो धूम इत्यालोकवान्पर्वत इति ज्ञानादनुमितिः स्यादिति। इ
त्थं च ज्ञानद्वयं यत्र तत्रापि विशिष्टज्ञानं कल्पनीयं। फलमुखगौरवस्यादोषत्वादिति। व्याप्यो नाम
व्याप्त्याश्रयः। तत्र व्याप्तिः केत्यत आह। व्याप्तिरिति। वह्निमान्धूमादित्यादौ साध्यं वह्निः साध्यवान्म
हानसादिस्तदन्यो जलह्रदादिस्तदवृत्तित्वं धूमस्येति लक्षणसमन्वयः। धूमवान्वह्नेरित्यादौ साध्यव
दन्यस्मिन्नयःपिंडादौ वह्नेः सत्वान्नातिव्याप्तिः। अत्र येन संबंधेन साध्यं तेनैव साध्यवान्बोध्यः अ ॥३८॥
न्यथा समवायसंबंधेन वह्निमांश्च वह्न्यवयवस्तदन्यो महानसादिस्तत्र धूमस्य विद्यमानत्वात् अ

व्याप्तिप्रसंगः। साध्यवदन्यश्च साध्यवत्त्वावच्छिन्नप्रतियोगिताकभेदवान्बोध्यः तेन यत्किंचिद्वह्निमतो महा
नसाद्भिन्ने पर्वतादौ धूमस्य सत्वेपि न क्षतिः। येन संबंधेन हेतुता तेनैव साध्यवदन्यावृत्तित्वं बोध्यं। तेन साध्य
वदन्यस्मिन्धूमावयवे धूमस्य समवायसंबंधेन सत्वेपि न क्षतिः। साध्यवदन्यावृत्तित्वं च साध्यवदन्यवृत्ति
त्वसामान्याभावः। तेन धूमवान्वह्नेरित्यत्र साध्यवदन्यह्रदादिवृत्तित्वाभावेपि नातिव्याप्तिः। अत्र यद्यपि द्र
व्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ विशिष्टसत्तायाः सत्तायाश्चैक्यात्साध्यवदन्यस्मिन्गुणादाववृ
त्तित्वं नास्ति तथापि हेतुतावच्छेदकरूपेण वृत्तित्वं वाच्यं हेतुतावच्छेदकं वृत्तितानवच्छेदकमिति फलितो
र्थः। ननु केवलान्वयिनि वाच्यं ज्ञेयत्वादित्यादौ साध्यवदन्यस्याप्रसिद्धत्वादव्याप्तिः। किंच। सत्तावान्ज

॥३९॥

त्तेरित्यादौ साध्यवदन्यासत्त्वसामान्याद्यो हेतुतावच्छेदकसंबंधेन समवायेन वृत्तेरप्रसिद्धत्वादव्याप्तिरत आह
। अथवा हेतुमन्निष्ठविरहाप्रतियोगिना साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते। हेतुमति निष्ठा वृत्तिर्य
स्य स तथा विरहो ऽभावस्तथा च हेत्वधिकरणवृत्तियोऽभावस्तदप्रतियोगिना साध्येन सह हेतोः सामानाधिक
रण्यं व्याप्तिः। अत्र यद्यपि वह्निमान् धूमादित्यादौ हेत्वधिकरणपर्वतादिवृत्त्यभावप्रतियोगित्वं तत्तद्व
ह्न्यादेरस्तीत्यव्याप्तिः। न च समानाधिकरणवह्निधूमयोरेव व्याप्तिरिति वाच्यं। तद्वह्नेरप्युभयाभावादिसत्त्वा
दिकसत्त्वेपि द्वयं नास्तीति प्रतीतेः। गुणवान् द्रव्यत्वादित्यादावव्याप्तिश्च तथापि साध्यतावच्छेदकप्रतियो ॥३९॥
गितानवच्छेदकमिति वाच्यं। ननु रूपत्वव्याप्यजातिमद्वृत्त [redacted]

त्वादि
[redacted] पृथिवीत्वादित्यत्र साध्यतावच्छेदिका रूपत्वव्याप्यजातयस्तासां शुक्लरूपा[redacted]दादिवृत्त्यभावप्रणां जातीनां न
तियोगितावच्छेदकत्वमस्तीत्यव्याप्तिरिति चेन्न। तत्र परंपरया रूपत्वव्याप्यजातित्वस्यैव साध्यतावच्छेदकत्वात् न घर
। नास्ति तादृशधर्मावच्छिन्नाभावः क्वापि पृथिव्यामस्ति। रूपत्वव्याप्यजातिमान्नास्तीति बुद्ध्यापत्तेः। साध्यादेर्भे
ना देन व्याप्तिभेदात्तादृशस्थले साध्यतावच्छेदकावच्छेदकप्रतियोगितावच्छेदकतानवच्छेदकमित्येव लक्षणा
घटकमित्यपि वदंति। दंड्यादौ साध्ये परंपरासंबंधेन दंडत्वादिकमेव साध्यतावच्छेदकं। साध्यतावच्छेदकताव
च्छेदकं प्रतियोगितावच्छेदकतानवच्छेदकमिति वाच्यं। हेत्वधिकरणं च हेतुतावच्छेदकविशिष्टाधिकर
णं वाच्यं। तेन द्रव्यं गुणकर्म[redacted]न्यत्वविशिष्टसत्त्वादित्यादौ शुद्धसत्ताधिकरणगुणादिनिष्ठाभावप्रति
योगित्वेपि द्रव्यत्वस्य नाव्याप्तिः। हेतुतावच्छेदकसंबंधेन हेत्वधिकरणं बोध्यं। तेन समवायेन धूमाधिकर

।४०॥ एतदवयवनिष्ठाभावप्रतियोगित्वेऽपि वह्नेर्नाव्याप्तिः। अत्र भावप्रतियोगिव्यधिकरणो बोध्यः। तेन कपिसंयो श्र

गी एतद्वृक्षत्वादित्यत्र मूलावच्छेदेन एतद्वृक्षवृत्तिकपिसंयोगाभावप्रतियोगित्वेऽपि कपिसंयोगस्य ना

व्याप्तिः। न च प्रतियोगिव्यधिकरणत्वं यदि प्रतियोग्यनधिकरणवृत्तित्वं तदा तद्दोषेवाव्याप्तिः प्रतियो

गिनः कपिसंयोगस्यानधिकरणे गुणादौ वर्त्तते योऽभावस्तस्यैव वृक्षे मूलावच्छेदेन सत्वात्। यदि प्रति

योग्यधिकरणावृत्तित्वं तदा संयोगीसत्वादित्यत्रातिव्याप्तिः। सत्ताधिकरणगुणादौ यः संयोगाभाव

स्तस्य प्रतियोग्यधिकरणद्रव्यावृत्तित्वादिति वाच्यं। हेत्वधिकरणे प्रतियोग्यनधिकरणवृत्तित्ववि ॥४०॥

शिष्टस्य विवक्षितत्वात्। स्वप्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्त्यभाव इति निष्कर्षः। प्रतियो

ग्यनधिकरणं च प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं बोध्यं। तेन गुणकर्मान्यत्वविशिष्टसत्ता

वान् जातेरित्यादौ ज्ञात्याधिकरणगुणादेर्विशिष्टाभावप्रतियोगिसत्वाधिकरणत्वेऽपि न क्षतिः। अत्र च साध्य

तावच्छेदकसंबंधेन प्रतियोग्यनधिकरणत्वं वाच्यं। तेन तत्तानवान् सत्वादित्यादौ सत्ताधिकरणघटादेर्विष

यतया ज्ञानाधिकरणत्वेऽपि न क्षतिः। धूमं च वह्निमान् धूमादित्यादौ धूमाधिकरणस्य समवायेन वह्निविरह

सत्वेऽपि न क्षतिः। ननु प्रतियोगितावच्छेदकावच्छिन्नस्य यस्य कस्यचिदनधिकरणत्वं तत्सामान्यस्य वा

यत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं वा विवक्षितं। आद्ये कपिसंयोगी एतद्वृक्षत्वा

दित्यत्राव्याप्तिः। कपिसंयोगाभावस्यापि प्रतियोगितावच्छेदकावच्छिन्नो वृक्षावृत्तिरपि कपिसंयोगो

न वृत्तित्तदनधिकरणं च वृक्ष इति। द्वितीये तु प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः सर्वस्यैवाभावस्य

पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात्। न च वह्निमान् धूमादित्यादौ

॥४२॥ घटाभावादेः स्वाभावात्मकप्रतियोग्यधिकरणत्वं यद्यपि पर्वतादेस्तथापि साध्यतावच्छेदकसंबंधेन प्र
तियोग्यनधिकरणत्वमस्त्येवेति कथं प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरिति वाच्यं। घटाभावे वर्त
ते यो वह्न्यभावस्तस्य घटाभावात्मकतया घटाभावस्य वह्निरपि प्रतियोगी तदधिकरणं च पर्वतादी
त्यादिक्रमेण प्रतियोगिव्यधिकरणाभावस्याप्रसिद्धत्वात्। यदि च घटाभावादौ वह्न्यभावादिभिन्न इत्यु
च्यते तथापि धूमाभाववान् वह्न्यभावादित्यादावव्याप्तिः। तत्र साध्यतावच्छेदकसंबंधः स्वरूपसंबं
धस्तेन संबंधेन च सर्वस्यैवाभावस्य पूर्वक्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोग्यधिकरण
त्वे हेत्वधिकरणस्येति। तृतीयेन कपिसंयोगाभाववानात्मत्वादित्यादावव्याप्तिः। तत्रात्मवृत्ति ॥४२॥
कपिसंयोगाभावाभावः कपिसंयोगस्तस्य प्रतियोगितावच्छेदकं गुणसामान्याभावत्वमपि तदव

च्छिन्नानधिकरणत्वं हेत्वधिकरणस्यात्मन इति। मैवं यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरण
त्वं हेतुमतस्तादृशप्रतियोगितानवच्छेदकत्वस्य विवक्षितत्वात्। ननु कालो घटवान् कालपरिमाणा
दित्यत्र प्रतियोगिव्यधिकरणाभावाप्रसिद्धिः। हेत्वधिकरणस्य महाकालस्य जगदाधारतया स
र्वेषामेवाभावानां साध्यतावच्छेदकसंबंधेन कालिकविशेषणतया प्रतियोग्यधिकरणत्वात्
। अत्र केचित्। महाकालान्यत्वविशिष्टघटाभावस्तत्र प्रतियोगिव्यधिकरणः। महाकालस्य
घटाधारत्वेपि महाकालान्यत्वविशिष्टघटानाधारत्वात् महाकाले महाकालभेदाभावात्। व
स्तुतस्तु प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यनाधिकरणीभूतहेत्वधिकरणवृत्त्यभाव

यत्संबंधः साध्यतावच्छेदकसंबंधः। यद्धर्मः साध्यतावच्छेदकः। तत्र यद्धर्मावच्छिन्नत्वाभावमात्रमुच्यते। तदा समवायेन यो वह्न्यभावस्त
स्य प्रतियोगितावच्छेदकसंबंधः समवायस्तेन प्रतियोग्यनधिकरणपर्वतादिवृत्तिः स एव तत्प्रतियोगितासाध्यतावच्छेदकेवह्निरिति
स्यव्याप्तिः स्यात्। यद्विषयसंबंधावच्छिन्नत्वाभावमात्रमुच्यते तदा तादृशस्य संयोगेन घटाभावस्य प्रतियोगितायां संयोगसंबंधावच्छि

॥४४॥ प्रतियोगिता सामान्ये यत्संबंधावच्छिन्नत्व यद्धर्मावच्छिन्नत्वोभयाभावस्तेन संबंधेन तद्धर्मावच्छिन्नस्य
हेतुव्यापकत्वंबोध्यं। व्यापकसामानाधिकरण्यंच व्याप्तिः। इदं च कालोघटवान् कालपरिमा
णादित्यादौ संयोगसंबंधेनघटाभावप्रतियोगिनो घटस्यानाधिकरणे हेत्वधिकरणे महाकाले
वर्त्तमानः स एव संयोगेनघटाभावस्तस्य प्रतियोगितायां कालिकसंबंधावच्छिन्नत्व घटत्वा
वच्छिन्नत्वोभयाभावसत्वान्नाव्याप्तिः। ननु प्रमेयवह्निमान् धूमादित्यादौ प्रमेयवह्नित्वावच्छि
न्नत्वमप्रसिद्धं। गुरुधर्मस्यानवच्छेदकत्वादितिचेन्न। कंबुग्रीवादिमान्नास्तीतिप्रतीत्या कं
बुग्रीवादिमत्वावच्छिन्नप्रतियोगिताविषयीकरणेन गुरुधर्मस्याप्यवच्छेदकत्वस्वीकारादितिसं

[illegible] ॥४५॥

दोषः। पक्षवृत्तित्वमित्यत्र पक्षत्वं किंतदाह। सिसाधयिषयेति। सिसाधयिषाविरहविशिष्टायाः
सिद्धेरभावः पक्षता। तद्वान् पक्ष इत्यर्थः। सिसाधयिषामात्रं न पक्षता विनापि सिसाधयिषां घनगर्जितेन मे
घानुमानात्। अत एव साध्यसंदेहोपि न पक्षता। विनापि संदेहं तदनुमानात्। सिद्धौ सत्यामपि सिसाधयिषासत्वे
ऽनुमितेस्तेवत्पेव। अतः सिसाधयिषाविरहविशिष्टत्वं सिद्धौ विशेषणं। तथा च यत्र सिद्धिर्नास्ति तत्र सिषाधयि
षायां सत्यामसत्यामपि पक्षता। यत्र सिसाधयिषास्ति तत्र सिद्धौ सत्यां असत्यामपि पक्षता। यत्र तु सिद्धिरस्ति सिसाध
त यिषा च नास्ति तत्र न पक्षता सिसाधयिषाविरहविशिष्टसिद्धेः सत्वात्। ननु यत्र परामर्शानंतरं सिद्धिस्ततः सिसाध
यिषा तत्र सिषाधयिषाकाले परामर्शनाशान्नानुमितिः यत्र सिद्धिपरामर्शसिषाधयिषाः क्रमेणान्तं

॥४६॥ त्तितत्र सिसाधयिषाकाले सिद्धेर्न्नाशात्प्रतिबंधकाभावादेवानुमितिः। यत्र सिसाधयिषासिद्धिपरामर्शाः। तत्र पराम
र्शकाले सिसाधयिषैव नास्ति। एवमन्यत्रापि सिद्धिकाले परामर्शकाले च न सिसाधयिषा योग्यविभुविशेषगु
णानां यौगपद्यनिषेधात्। तत्कथं सिसाधयिषाविरहविशिष्टत्वं सिद्धेर्विशेषणमिति चेन्न। यत्र वह्निव्याप्य
धूमवान्पर्वतो वह्निमान् इति प्रत्यक्षं स्मरणं वा ततः सिसाधयिषा। तत्र पक्षतासंपत्तये तद्विशेषणस्याव
श्यकत्वात् इति। अत्रेदं बोध्यं। यादृशसिसाधयिषासत्वे सिद्धिसत्वे यल्लिंगकानुमितिस्तादृशसिसाधयि
षाविरहविशिष्टसिद्ध्यभावस्तल्लिंगकानुमितौ पक्षता। तेन सिद्धिपरामर्शसत्वे यत्किंचिज्ज्ञानं जायतामि
तीच्छायामपि नानुमितिः। वह्निव्याप्यधूमवान्पर्वतो वह्निमानिति प्रत्यक्षसत्वे प्रत्यक्षातिरिक्तं ज्ञानं जाय त्य ॥४३॥

यतामितीच्छायां तु भवत्येव। एवं धूमपरामर्शसत्वे आलोकेन वह्निमनुमिनुयामितीच्छायामपि नानुमितिः
। सिसाधयिषाविरहकाले यादृशसिद्धिसत्वे नानुमितिस्तादृशी सिद्धिर्विशिष्य वक्तव्या। तेन पर्वतस्तेजस्वी
पाषाणमयो वह्निमानिति ज्ञानसत्वेप्यनुमित्तेर्न विरोधः। परं तु पक्षतावच्छेदेनानुमितिं प्रति पक्षतावच्छेदका
वच्छेदेन सिद्धिरेव प्रतिबंधिका। पक्षतावच्छेदकसामानाधिकरण्येनानुमितिं प्रति सिद्धिमात्रं विरोधि इदं तु बो ति
ध्यं। यत्रायं पुरुषो न वेति संशयानंतरं [redacted] पुरुषत्वव्याप्यकरादिमानयमिति ज्ञानं तत्रासत्यामनुमित्सायां
ल पुरुषस्य प्रत्यक्षं भवति। न त्वनुमितिर तोनुमित्साविरहविशिष्टसमानविषयकप्रत्यक्षसामग्री का
मितीजिज्ञासादिकस्वातंत्र्येण प्रतिबंधिका। एवं परामर्शानंतरं विना प्रत्यक्षेच्छां [redacted] प्रत्यक्षानुत्पत्तेः
दकसामानाधिकरण्येन साध्यसिद्धावपि तदवच्छेदेनानुमितेर्दर्शनात्। पक्षतावच्छेदकावच्छे ५

प्रतिपक्षेच्छाविरहविशिष्टानुमितिसामग्रीभिन्नाविषयकप्रत्यक्षे प्रतिबंधिकेति संक्षेपः ।प्रसंगाद्धेत्वाभासान्विभजते
।अनैकांतो विरुद्धश्चाप्यसिद्धः प्रतिपक्षितः कालात्ययापदिष्टश्च हेत्वाभासाश्च पंचधा । आद्यः साधारणस्तु स्या
दसाधारणकोपरः ।तथैवानुपसंहारी त्रिधानैकांतिको भवेत् ।तल्लक्षणं च यद्विषयकत्वेन ज्ञानस्यानुमितिवि
रोधित्वं तद्वत्त्वं हेत्वाभासत्वं ।तथाहि व्यभिचारादिविषयकत्वेन ज्ञानस्यानुमितिविरोधित्वात्ते दोषाः ।यद्विषयक
त्वं च यादृशविशिष्टविषयकत्वं बोध्यं तेन बाधभ्रमस्यानुमितिविरोधित्वे तत्र पर्वतो वह्न्यभाववानिति विशि
ष्टस्याप्रसिद्धत्वान्न हेतुदोषः ।न चैवं वह्न्यभावव्याप्यपाषाणमयत्ववानिति परामर्शकाले वह्निव्याप्यधूम ॥४४॥
स्याभासत्वं न स्यात् ।तत्र वह्न्यभावव्याप्यवान् पर्वत इति विशिष्टस्याप्रसिद्धत्वादिति वाच्यं ।इष्टापत्तेः अ

न्यथा बाधस्याप्यनित्यदोषत्वापत्तेः ।तस्मात्तत्र वह्न्यत्तावव्याप्य पाषाणमयत्ववानिति परामर्शकालेन वह्निव्या
धूम प्यस्याभासत्वं ।धूमादनुमितिप्रतिबंधमात्रं हेतुस्तत्र न दुष्टः ।इत्थं च साध्याभाववद्वृत्तिहेत्वादिकं दोषस्तद्वत्ता च
हेतौ येन केनापि संबंधेनेति नव्याः ।अपरे तु यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तद्वत्त्वं हेत्वाभासत्वं
।सत्प्रतिपक्षे विरोधिव्याप्त्यादिकमेव तथा ।तद्वत्त्वं च हेतोर्ज्ञानरूपसंबंधेन ।न चैवं वह्निमान् धूमादित्या
दौ पक्षे साध्याभावविषयकत्वेनानुमितिविरोधित्वात् ज्ञानरूपसंबंधेन तद्वत्त्वस्यापि सत्त्वात् सद्धेतोरपि
बाधितत्वापत्तिरिति वाच्यं ।तत्र ज्ञानस्यासंबंधत्वाकल्पनाच्च सत्प्रतिपक्ष इति व्यवहारेण तत्कल्प
नात् ।तत्र बाधितव्यवहाराभावादित्याहुः ।अनुमितिविरोधित्वं च अनुमितितत्कारणीभूतान्यतरवि
रोधित्वं तेन व्यभिचारिणि नाव्याप्तिः ।दोषज्ञानं च यद्धेतुविषयकं तद्धेतुकानुमितौ प्रतिबंधकं ।तेन एकहे

॥४५॥

संभव १ वा २

तोव्यभिचारज्ञानहेत्वंतरेणानुमित्युत्पादात्तद्ग्राह्याभावाद्यनवगाहित्वाच्च व्यभिचारज्ञानस्यानुमितिविरोधि
त्वाभावेपि न क्षतिरितिसंक्षेपः। यादृग्रूपसाध्यपक्षकहेतौ यावंतो दोषास्तावदन्यान्यत्वं तत्र हेत्वाभासत्वं। पंच त्व
कथनंतु तत्तत्स्थूलाभिप्रायेण॥ एवं साधारणाद्यन्यतमत्वं अनैकांतिकत्वं। साधारणः साध्यवदन्यवृत्ति
स्तेन च व्याप्तिज्ञानप्रतिबंधः क्रियते। अनेन तु। सपक्षावृत्तिरसाधारणः सपक्षश्च निश्चितसाध्यवान्
। दृष्टांतश्च शब्दो ऽनित्यः शब्दत्वादित्यादौ यदा पक्षे साध्यनिश्चयस्तदानासाधारण्यं। तत्र हेतोर्निश्चयादि
त्याहुः। अनुपसंहारी च अत्यंताभावाप्रतियोगिसाध्यकादिः। अनेन च व्यतिरेकव्याप्तिज्ञानप्रति ॥४५॥
बंधः क्रियते। विरुद्धस्तु साध्यव्यापकीभूताभावप्रतियोगी। अयं च साध्याभावग्रहसामग्रीत्वेन प्रति
असाधारणः साध्यासमानाधिकरणः। तेन साध्यसामानाधिकरण्यग्रहः प्रतिबंधः क्रियते। ४ शब्दो नित्यः शब्दत्वादित्यादौ

साध्याभावसाधक एव साध्यसाधकत्वेनोपन्यस्त इत्यधिकविशेषोल्लापकत्वाच्च विशेषः। २

बंधकः सत्प्रतिपक्षेतु प्रतिहेतुः साध्याभावसाधकः अत्र हेतुरेवेति विशेष ॥ सत्प्रतिपक्षः साध्या
भावव्याप्यवान्पक्षः। अगृहीताप्रामाण्यकसाध्यव्याप्यवत्त्वप्रकारकोपस्थितिकालीनतदन्या
३ स्तथेत्यन्ये वव्याप्यवत्त्वेनोपस्थितिविषयः। अत्र च परस्पराभावव्याप्यवत्ताज्ञानात्परस्परानुमितिप्रतिबंधः
फलं। अत्र केचित्। यथा घटाभावव्याप्यवत्ताज्ञानेवि [illegible] धर्म्यघट चक्षुः संयोगे सति घटवत्ताज्ञानं नेपि ४
जायते। तथा च सत्यपि पीतत्वाभावव्याप्यशंखत्ववत्ताज्ञाने सति पित्तादिदोषे पीतः शंखइति पि
धीरेवं कोटिद्वयव्याप्यदर्शने कोटिद्वयस्याप्युत्पक्षरूपः संशयो भवति। यथा सत्प्रतिपक्ष
स्थले संशयरूपानुमितिर्भवति। यत्रैकैककोटिव्याप्यदर्शनं तत्राधिकबलतया द्वितीय

॥४९॥ कोटिज्ञानप्रतिबंधान्न संशयः। फलबलेन चाधिकसमबलभावः कल्प्यत इत्याहुः। तन्न।
तद्ज्ञानव्याप्यवत्ताज्ञाने सति तदुपनीतज्ञानविशेषशाब्दबोधादेरनुदयात्। लौकिकसन्नि
कर्षाजन्यदोषविशेषाजन्यज्ञानमात्रे तस्य प्रतिबंधकतालाघवात्। न तूपनीतज्ञानविशेषशाब्दबो
धे च पृथक् प्रतिबंधकता गौरवात् तथा च प्रतिबंधकसत्त्वात्कथमनुमितिः। न हि लौकिकसन्निकर्ष
स्थले प्रत्यक्षमिव सत्प्रतिपक्षस्थले संशयाकारानुमितिः प्रामाणिकी येनानुमितिभिन्नत्वेन
पि विशेषणीयं। यत्र च कोटिद्वयव्याप्यवत्ताज्ञानं तत्रोभयत्र प्रामाण्यज्ञानात्संशयः। नान्यथा। अगृही
तप्रामाण्यकस्यैव विरोधिज्ञानस्य प्रतिबंधकत्वादिति। आश्रयासिद्धिस्तु। आश्रयासिद्ध्याद्यन्यतमा। ॥४६॥
आश्रयासिद्धिस्तु पक्षे पक्षतावच्छेदकस्याभावः। यत्र कांचनमयः पर्वतो वह्निमानिति साध्यते तत्र पर्वते न कां
चनमयत्वति ज्ञाने विद्यमाने।

कांचनमयपर्वते परामर्शप्रतिबंधः फलं। स्वरूपासिद्धिस्तु पक्षे व्याप्यत्वाभिमतस्याभावः। अत्र ह्रदो द्रव्यं धू
मादित्यादौ पक्षे व्याप्यत्वाभिमतस्य हेतोरभावे ज्ञाते पक्षे व्याप्यहेतुमत्ताज्ञानरूपस्य परामर्शस्य प्रतिबंधः फलं। सा
ध्याप्रसिद्ध्यादयस्तु व्याप्यत्वासिद्धिः। साध्ये साध्यतावच्छेदकविशिष्टसाध्यपरामर्शप्रतिबंधः। एवं हेतुतावच्छेद
काभावः साधनाप्रसिद्धिः। यथा कांचनमयधूमादित्यादौ। अत्र च हेतुतावच्छेदकविशिष्टज्ञानाभावात्तद्धेतुकव्या
प्तिज्ञानादेरभावः फलं। एवं वह्निमान्नीलधूमादित्यादौ गुरुत्वान्नीलधूमत्वस्य हेतुतानवच्छेदकत्वमपि व्याप्यत्वा
सिद्धिरिति वदंति। बाधस्तु पक्षे साध्याभावः साध्यवदन्यत्वादिः। एतस्य चानुमितिप्रतिबंधः फलं। तद्धर्मिकतदभाव
निश्चयो लौकिकसन्निकर्षाजन्यदोषविशेषाजन्यतज्ज्ञानमात्रे विरोधीति। न च संशयसाधारणं पक्षे सा

सि॰मु॰
४८

असंसृष्टत्वज्ञानमनुमितिकारणं तद्विरोधितया च बाधसत्प्रतिपक्षयोर्हेत्वाभासत्वमुक्तमिति वाच्यं
साध्यसंशयादिकं विनाऽनुमित्युत्पत्तेः। एवं साध्याभावज्ञाने प्रमात्वज्ञानमपि न प्रतिबंधकं।
प्रमाणाभावात् गौरवाच्च। अन्यथा सत्प्रतिपक्षादावपि तदभावव्याप्यज्ञाने प्रमात्वविषयकत्वेन
प्रतिबंधकत्वापत्तेः। किंतु भ्रमत्वज्ञानानास्कंदितबाधबुद्धेः प्रतिबंधकता। तत्र भ्रमत्वशं
काविघटने प्रामाण्यज्ञानं क्वचिदुपयुज्यते। न च बाधस्थले पक्षे हेतुसत्वं व्यभिचारपदे हेत्वे भा
वे स्वरूपासिद्धिरेव दोष इति वाच्यम्। बाधज्ञाने व्यभिचारज्ञानदेर्भेदात्। किंच यत्र परामर्शानंतरं
बाधबुद्धिस्तत्र व्यभिचारज्ञानादेरकिंचि [redacted] ४८

च२

बाध २ सत्प्रतिपक्ष २

त्करत्वात् बाधस्यानुमितिप्रतिबंधकत्वं वाच्यं। एवं यत्रोत्पत्तिक्षणावच्छिन्नघटादौ गंधव्याप्यपृथिवीत्ववत्ताज्ञानं त
त्र बाधस्यैव प्रतिबंधकत्वं वाच्यं। न च पक्षे घटे गंधसत्वात्कथं बाध इति वाच्यं। पक्षतावच्छेदकदेशकालावच्छे
देनानुमितेरप्रभवसिद्धत्वादिति। सत्प्रतिपक्षेतद्व्याप्यभिन्नाये हेत्वाभासास्तद्व्याप्योपि तन्मयो एवांतर्भवंति
४ व्याप्य। अन्यथा हेत्वाभासाधिक्यप्रसंगात्। बाधसत्प्रतिपक्षौ भिन्नावेव स्वतंत्रेच्छेन मुनिना पृथगुपन्यस्तौ सत्प्र
तिपक्षव्याप्यस्तेन प्रतिबंधक इति। यः सपक्ष इति। सपक्षविपक्षव्यावृत्तिः साधारणाद्यर्थः। सपक्षः सा
ध्यवान्। विपक्षः साध्याभाववान्। विरुद्धवारणाय सपक्षवृत्तित्वमुक्तं। वस्तुतो विपक्षवृत्तित्वमेव वा
च्यं। विरुद्धस्य साधारणात्वे दूषकताबीजस्य भिन्नतया तस्य पार्थक्यात्। यस्त्वित्यस्यादिति। सपक्षविप
क्षव्यावृत्त इत्यर्थः। सपक्षः साध्यवत्तया निश्चितः। विपक्षः साध्याभाववत्तया निश्चितः। शब्दोऽनित्यः शब्दत्वा

॥४८॥ दित्यादौ यदा शब्देऽनित्यत्वस्य संदेहस्तदा सपक्षत्वं घटादीनामेव तद्व्यावृत्तत्वं च शब्दत्वमिति तदसाधारणं । यदा
तु शब्दे नित्यत्वनिश्चयस्तदा नासाधारणः । इदं च प्राचां मतेन । नवीनमतं पूर्वमुक्तं । केवलान्वयिपक्षक इति । केवलान्व तु
दित्या यिधर्मावच्छिन्नपक्षक इत्यर्थः । सर्वमभिधेयं प्रमेयत्वादौ सर्वेषामेव पक्षत्वात् । सामानाधिकरण्यग्रहे स्थला
तराभावात् नानुमितिः । इदं तु न सम्यक् पक्षैकदेशे सहचारग्रहेऽपि क्षतेरभावात् । अस्तु वा सहचारग्रह
स्तावता व्याप्तिज्ञानरूपासिद्धिरिव तु न हेत्वाभासत्वं तस्य तथापि केवलान्वयिसाध्यकत्वं तत्त्वमित्युक्तं । यः सा
ध्यवतीति । एवकारेण साध्याधिकरणत्वावच्छेदेन हेत्वभावो बोधितः । तथा च साध्यव्यापकीभूताभा
वप्रतियोगित्वं तदित्यर्थः । असिद्धिं विभजते । [redacted] आश्रयासिद्धि ॥४८॥

सत्प्र ४

रित्यादि । पक्षासिद्धिरिति । आश्रयासिद्धिरित्यर्थः । अपरेति । स्वरूपासिद्धिरित्यर्थः । नीलधूमादिक इति
। नीलधूमत्वं गुरुतया न हेतुतावच्छेदकं । समानाधिकरणव्याप्यतावच्छेदकधर्मान्तराघटितस्यैव व्या
प्यतावच्छेदकत्वात् । धूमप्रागभावसंग्रहाय समानाधिकरणेति । विरुद्धयोरिति । कपिसंयोगतदत्ताव
व्याप्यवत्तापरामर्शोऽपि न × तिप्रतिबन्धकत्वमतः विरुद्धयोरिति । तथा च स्वसाध्यविरुद्धसाध्याभावव्याप्यवत्ता
परामर्शकालीनसाध्यव्याप्यवत्तापरामर्शविषयत्वमित्यर्थः । साध्यशून्य इति पक्षः । पक्षतावच्छेदकविशि
ष्ट इत्यर्थः । तेन घटे गंधसत्त्वेऽपि न क्षतिः । एवं मूलावच्छिन्नो वृक्षः कपिसंयोगीत्यत्रापि बोध्यं । उपमि
तिं व्युत्पादयति ॥ ॥ ग्रामीणस्येति । यत्रारण्यकेन केनचिद्ग्रामीणाय गोसदृशो गवयपदवाच्य इति कं
। पश्चाच्च ग्रामीणेन क्वचिदरण्यादौ गवयो दृष्टस्तत्र गोसादृश्यज्ञानं यज्जातं तदुपमितिकरणं । तद

सौतै २

॥४९॥ नंतरं गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थस्मरणं यज्ज्ञायते तदेव व्यापारस्तदनंतरं गवयेऽत्र ग
वयपदवाच्यत्वज्ञानं यज्जायते तदुपमितिः। नत्वयं गवयपदवाच्य इत्युपमितिः। गवांतरे शक्तिग्रहाभा
वप्रसंगात् ॥ । शाब्दबोधप्रकारं दर्शयति। पदज्ञानं तु करणमिति। न तु ज्ञायमानं करणं पदाभावेऽपि
मौनिश्लोकादौ शाब्दबोधात्। पदार्थधीरिति। पदजन्यपदार्थस्मरणं व्यापारः। अन्यथा पदज्ञानवतः
प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तेः। तत्रापि वृत्त्या पदजन्यत्वं बोध्यं। अन्यथा घटादिप
दात्समवायेनाकाशस्मरणे जाते आकाशस्यापि शाब्दबोधापत्तेः। वृत्तिश्च शक्तिलक्षणान्यतरसंब ॥४९॥
धः। अत्रैव शक्तिज्ञानस्योपयोगः। पूर्वं शक्तिग्रहाभावे पदज्ञानेऽपि तत्संबंधेन स्मरणानुपपत्तेः। प
दज्ञानस्य संबंधिज्ञानविधया अर्थस्मारकत्वं। शक्तिश्च पदेन सह पदार्थस्य संबंधः स चास्मात्प

दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपः। आधुनिके नाम्नि शक्तिरस्त्येव। एकादशेपिता नाम कुर्यादितीश्वरेच्छायाः हनि
सत्वात्। आधुनिकसंकेते तु न शक्तिरिति संप्रदायः। नव्यास्तु ईश्वरेच्छा न शक्तिः किंतु इच्छैव। तेनाधुनिक
त संकेतेऽपि शक्तिरस्तीत्याहुः। शक्तिग्रहस्तु व्याकरणादिः। तथाहि। शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्या
द्व्यवहारतश्च ॥ वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धाः। धातुप्रत्ययादीनां शक्तिग्रहो व्याकरणा
द्भवति। क्वचित्तु सति बाधके त्यज्यतेऽपि। यथा वैयाकरणैराख्यातस्य कर्तरि शक्तिरुच्यते चैत्रः पचतीत्या
दौ कर्त्रा सह चैत्रस्याभेदेनान्वयः। तच्च गौरवात्त्यज्यते। किंतु कृतौ शक्तिर्लाघवात्। कृतिश्चैत्रादौ प्रकारीभूय
भासते। न च कर्तुरनभिधानात् चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यं। कर्तृसंख्यानभिधानस्य तत्र तंत्रत्वात्
। संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमांतपदोपस्थाप्यः कर्तृत्वादौ त्वस्येतरविशेषणत्वं तत्र

।।५०।।

वं द तु व

यो विषयत्वमर्थः। तेन चैत्रस्त्वं गच्छतीत्यादौ न चैत्रे संख्यान्वयः। यत्र कर्मादौ न विशेषणत्वं तात्पर्यं तद्वारणाय
प्रथमान्तेति। यद्वा धात्वर्थातिरिक्तो विशेषणं प्रथमान्तार्थः। तेन चैत्रस्त्वं गच्छतीत्यत्र चैत्रादेर्वारणं। स्तोकं पचतीत्या
दौ स्तोकादेर्वारणाय द्वितीयं। तस्य द्वितीयान्तोपस्थाप्यत्वाद्वारणं। एवं व्यापारेपि न शक्तिर्गौरवात्। रथो गच्छ
तीत्यादौ व्यापारे आश्रयत्वे वा लक्षणा। जानातीत्यादौ आश्रयत्वे। नश्यतीत्यादौ प्रतियोगित्वे निरूढलक्ष
णा। उपमानाद्यथा शक्तिग्रहस्तथोक्तं। एवं कोशादपि शक्तिग्रहः सति बाधके क्वचित्त्यज्यते। यथा नीलादि
पदानां नीलरूपादौ नीलादिविशिष्टे च शक्तिः कोशेन व्युत्पादिता तथापि लाघवान्नीलादौ शक्तिः नीलादिवि
शिष्टे तु लक्षणेति। एवमाप्तवाक्यादपि। यथा कोकिलः पिकपदवाच्य इत्यादिशब्दात् पिकादिशब्दे शक्ति
ग्रहः। एवं व्यवहारादपि यथा प्रयोजकवृद्धेन घटमानयेत्युक्तं तच्छ्रुत्वा प्रयोज्यवृद्धेन घट आनीतस्तद ।।५०।।

वधार्य पार्श्वस्थो बालो घटानयनरूपं कार्यं घटमानयेति शब्दप्रयोज्यमित्यवधारयति। ततश्च घटं [redacted] नय गामा
नयेत्यादिवाक्यादावापोद्वापाभ्यां घटादिपदानां कार्यान्वितघटादौ शक्तिं गृह्णाति। इत्थं च भूतले नीलो घ
ट इत्यादिशब्दान्न शाब्दबोधः। घटादिपदानां कार्यान्वितघटादिबोधे सामर्थ्यावधारणात्। कार्यताबोधं प्रति च न
लिङादीनां सामर्थ्यात् तदभावान्न शाब्दबोध इति केचित्। तन्न। प्रथमतः कार्यान्वितघटादौ शक्त्यवधा
रणेपि लाघवेन पश्चात्तस्य परित्यागौचित्यात्। अत एव पुत्रस्ते जातः कन्या ते गर्भिणीत्यादौ मुखप्रसादमु वैत्र
खमालिन्याभ्यां सुखदुःखे अनुमाय तत्कारणत्वेन परिशेषाच्छाब्दबोधं निर्णीय तद्धेतुतया तं शब्दं अ
वधारयति। तथापि व्यभिचारात्कार्यान्विते न शक्तिः। न च तत्र तं पश्येत्यादिशब्दान्तरमध्याहार्यं मानाभावा तः

घटमात्रे शक्तिमवधारयति॰ वाक्यशेषादपि शक्तिग्रहः यथा यवम

न्या २

॥५१॥ चैत्रपुत्रस्ते जातो मृतश्चत्या दौत्तद भावाच्च । इत्थं चलाघवादन्वितघटेपि शक्तिं त्यक्त्वा घटपदस्य । दीर्घश्मश्रुक विशे

विशिष्टे घ॰ आर्याणां प्रयोगः कुंगौ च म्लेछानां । यत्रान्ये ओषधयो म्लायन्ते अथैते मोदमाना एवोत्तिष्ठंतीति वाक्यशे वै

विशिष्टेषा दीर्घश्मश्रुकं शक्तिर्निर्णीयते । [redacted] । कंगौतु शक्तिभ्रमात्प्रयोगः । नानाशक्तिकल्पनागौरवात्

। हरिपदादौ विनिगमकाभावान्नानाशक्तिकल्पनं । एवं विवरणादपि शक्तिग्रहः । विवरणं तु तत्समाना

र्थकपदांतरेण तदर्थकथनं । यथा घटोस्तीत्यस्य कलशोस्तीत्यनेन विवरणे घटपदस्य कलशे शक्तिग्रहः ।

दा एवं पचतीत्यस्य पाकं करोतीत्यनेन विवरणात्ख्यातस्य यत्नार्थकत्वं कल्प्यते । एवं प्रसिद्धपदसान्निध्यादपि ॥५१॥

शक्तिग्रहः । यथा इह सहकारतरौ मधुरं पिको रौतीत्यादौ पिकपदस्य शक्तिग्रह इति । तत्र जातावेव शक्ति

वसंते सर्वसस्यानां जायते पत्रशातनं ॥ मोदमानाश्च तिष्ठंतीय वाक्

शेषशालिनइ ६

यवमयश्चरुर्भवति यवपदस्य दीर्घशूकविशेष

नतु व्यक्तौ व्यभिचारादानंत्याच्च । व्यक्तिं विना च जातिज्ञानस्यासंभवात् । व्यक्तेरपि भानमिति केचित् । तन्न । शक्तिं विना व्यक्ति

भानस्योपपत्तेः नव व्यक्तौ लक्षणा । अनुपपत्तिप्रतिसंधानं विनापि व्यक्तिबोधात् । नच व्यक्तिशक्तावानंत्यं । सक

लव्यक्तावेकस्या एव शक्तेः स्वीकारात् । नचाननुगमः । गोत्वादेरेवानुगमकत्वात् । किंच गौः शक्येति शक्तिग्र

हो यदि तदा व्यक्तौ शक्तिः यदि तु गोत्वं शक्यमिति शक्तिग्रहस्तदा गोत्वप्रकारकपदार्थस्मरणं शाब्दबोधश्च तस्मा

त् । समानप्रकारकत्वेन शक्तिज्ञानस्य पदार्थस्मरणं शाब्दबोधं प्रति च हेतुत्वात् । किंच गोत्वे यदि शक्तिस्तदा

गोत्वत्वं शक्यतावच्छेदकं वाच्यं । गोत्वत्वं तु गवेतरासमवेतत्वे सति सकलगोसमवेतत्वं । तथा च गोव्यक्तीनां

शक्यतावच्छेदकेनुप्रवेशात् तवैव गौरवं । तस्मात्तत्तज्जात्याकृतिविशिष्टतत्तद्व्यक्तिबोधानुपपत्त्या कल्प्यमा

ना शक्तिर्जात्याकृतिविशिष्टव्यक्तौ विश्राम्यतीति । शक्तं पदं च क्वचिद्यौगिकं क्वचिद्रूढं । क्वचिद्योगरूढं । क्व

॥५२॥

च्चियौगिकरूढं। तथाहि। यत्रावयवार्थ एव बुध्यते तद्यौगिकं। यथा पाचकादिपदं। यत्रावयवशक्तिनैरपेक्ष्ये

ण समुदायशक्तिमात्रेण बुध्यते तद्रूढं। यथा गोपदं मंडपादिपदं। यत्र तु अवयवशक्तिविषये समुदायशक्तिर

पदं प्यस्ति तद्योगरूढं। यथा पंकजादि। तथाहि पंकजपदमवयवशक्त्या पंकजनिकर्तृरूपमर्थं बोधयति। समुदाय श

शक्त्या च पद्मत्वेन रूपेण पद्मं बोधयतीति। न च केवलावयवशक्त्या कुमुदे प्रयोगः स्यादिति वाच्यं। रूढिज्ञानस्य के

वलयौगिकार्थग्रहप्रतिबंधकत्वादिति प्राचः। वस्तुतस्तु। समुदायशक्त्योपस्थितपद्मे अवयवार्थपंकजनि

कर्तुरन्वयो भवति सान्निध्यात्। यत्र रूढ्यर्थस्य बाधः प्रतिसंधीयते तत्र लक्षणया कुमुदादेर्बोधः। यत्र कु तु

च मुदत्वेन रूपेण तात्पर्यज्ञानं पद्मत्वस्य बाधस्तत्रावयवशक्तिमात्रेणेति बोध्यं इत्यप्याहुः। यत्र तु स्थलपंक ॥५२॥

जं विजातीयमिव तत्रालक्षणैवेति। यत्र तु यौगिकार्थरूढ्यर्थयोः स्वातंत्र्येण बोधस्तद्यौगिकरूढं। यथोद्भि

स्थलपद्मादावयवेवार्थबाधस्तत्र समुदायशक्त्या पद्मत्वेन रूपेण बोधः। यदि तु र

दादिपदं। तत्र हि ऊर्ध्वभेदकर्तृतरुगुल्मादिरपि बुध्यते यागविशेषोपीति। लक्षणा शक्यसंबंध इति। गंगायां घोष

इत्यादौ गंगापदस्य शक्यार्थे प्रवाहरूपे घोषस्यान्वयानुपपत्तिस्तात्पर्यानुपपत्तिर्वा यत्र प्रतिसंधीयते तत्र ल

क्षणया तीरस्य बोधः। सा च शक्यसंबंधरूपा। तथाहि। प्रवाहरूपशक्यार्थसंबंधस्य तीरे गृहीतत्वात्तीरस्य स्म

रणं। ततः शाब्दबोधः॥ परंतु यद्यन्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा यष्टीः प्रवेशयेत्यत्र लक्षणा न स्या

द्यष्टिषु प्रवेशस्यान्वयानुपपत्तेरभावात्। तेन प्रवेशभोजनतात्पर्यानुपपत्त्या यष्टिधरे लक्षणा। एवं का

केभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य दध्युपघातकेषु लक्षणा। सर्वतो दधिरक्षायास्तात्पर्यविषयत्वात्

।एवं छत्रिणो यांतीत्यादौ छत्रिपदस्यैकसार्थवाहित्वेन लक्षणा। इयमेवाजहत्स्वार्था लक्षणेत्युच्य

ते। एकसार्थवाहित्वेन रूपेण छत्रितदन्ययोर्बोधात्। यदि चान्वयानुपपत्तिर्लक्षणाबीजं स्यात्तदा घ

॥५३॥ चिद्गंगापदस्यातीरेवृत्तिर्घोषपदस्य मत्स्यादौ लक्षणेतिनियमो न स्यात् । इष्टं च तु बोधं । शक्यार्थसंबंधो यदि तीरत्वेन
रूपेण गृहीतस्तदा तीरत्वेन तीरबोधः । यदि तु गंगातीरत्वेन रूपेण गृहीतस्तदा तेनैव रूपेण स्मरणं । अत एव
लक्ष्यतावच्छेदकेन लक्षणा । तत्प्रकारकबोधस्य तत्र लक्षणां विनानुपपत्तेः । पूर्वं तु एवं क्रमेण शक्यताव
च्छेदकेत्वेपि शक्तिर्न स्यात् तत्प्रकारकशक्यार्थस्मरणं प्रति तत्तत्पदस्य सामर्थ्यान्नित्यस्य च वत्त्वादिति विभा
वनीयं । यत्र तु शक्यार्थस्य परंपरासंबंधरूपा लक्षणा सा लक्षितलक्षणेत्युच्यते । यथा द्विरेफादिपदे रे
२ फद्वयसंबंधो भ्रमरपदे ज्ञायते । भ्रमरपदस्य संबंधो भ्रमरे ज्ञायते तत्र लक्षितलक्षणा । किं तु लाक्षणिकं पदं नानु ॥५३॥
भावकं । लाक्षणिकार्थस्य शाब्दबोधे तत्पदार्थसंस्कारणां । शक्तिलक्षणान्यतरसंबंधेनेतरपदार्थान्वित स्व
शक्यार्थशाब्दबोधप्रतिपदानां सामर्थ्यावधारणात् । वाक्ये तु शक्तेरभावात् । शक्यसंबंधरूपा लक्षणापि न

५ एवमारूढवान्रोहः स्यादित्यत्रापि वानरपदे वानरारोहणकर्मेति लक्षणा । आरूढपदं तात्पर्यग्राहकं ५
नदी स्ति । यत्र तु गभीरायां नद्यां घोष इत्युक्तं तत्र नदीपदस्य तीरे लक्षणा गभीरपदार्थस्य न द्यासहान्वयः । क्वचिदेकदे
शान्वयस्याप्यस्वीकारात् । यदि तत्रैकदेशान्वयो न स्वीक्रियते तदा नदीपदस्य गभीरनदीतीरे लक्षणा गभीरपदं
तात्पर्यग्राहकं । बहुव्रीहावप्येवं । तत्र हि चित्रगुपदादौ यद्येकदेशान्वयः स्वीक्रियते तदा गोपदस्य गोमति लक्षणा
विचित्राभेदान्वयः । यदि त्वेकदेशान्वयो न स्वीक्रियते तदा गोपदस्य चित्रगोमति लक्षणा । चित्रपदं तात्पर्यग्रा
हकं तत्पुरुषे तु पूर्वपदे लक्षणा । तथा हि राजपुरुषादिपदे राजपदार्थेन पुरुषादिपदार्थस्य साक्षान्नान्व
यः । निपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधस्याव्युत्पन्नत्वात् । अन्यथा राजपुरुष इत्यत्रापि तथान्वयबो
धः स्यात् । घटो न पट इत्यादौ घटपटाभ्यां नञः साक्षादेवान्वया निपातातिरिक्तेति । नीलो घट इत्यादौ नामार्थयोर
भेदसंबंधेनान्वयादृष्टेरिति । न च राजपुरुष इत्यादौ लुप्तविभक्तेः स्मरणं कल्प्यमिति वाच्यं । अस्मृतविभक्ते

॥५४॥

रपितत्तोबोधोदयात्। तस्माद्राजपदादौ राजसंबंधिनि लक्षणा। तत्पुरुषेणासहाभेदान्वयः। द्वंद्वे तु धवखदि
रौ छिंधीत्यादौ धवश्च खदिरश्च विभक्त्यर्थद्वित्वप्रकारेणाबुध्यते तत्र न लक्षणा न च साहित्ये लक्षणेति वाच्यं।
साहित्यशून्ययोरपि द्वंद्वदर्शनात्। न चैकक्रियान्वयित्वरूपं साहित्यमस्तीति वाच्यं क्रियाभेदेपि धवखदिरौ प
श्यच्छिंधीत्यादौ दर्शनात् साहित्यस्याननुगतत्वाच्च। अत एव राजपुरोहितौ सायुज्यकामौ यजेयातामित्यत्र लक्षणा
भावाद् द्वंद्व आश्रीयते। तस्मात्साहित्यादिकं नार्थः। किंतु वास्तवो भेदो यत्र तत्र द्वंद्वः। न च नीलघटयोरभेद इत्यादौ
कथमिति वाच्यं। तत्र नीलपदस्य नीलत्वे घटपदस्य घटत्वे लक्षणा अभेद इत्यस्य स्वाश्रयाभेद इत्यर्थात्। समा ॥५४॥
तदा हारद्वंद्वे तु यदि समाहारो धवत्वेन भूयते द्रष्टव्यं तदा अहिनकुलमित्यादौ परपदे अहिनकुलसमाहारे लक्षणा पू स्या
र्वपदं तु तात्पर्यग्राहकं। न च भेरीमृदंगं वादयेत्यत्र कर्मसमाहारापेक्षाबुद्धिविशेषरूपस्य वादनासंभवादिति

पितरौ श्वशुरावित्यादौ पितृपदे जनकदंपत्योः श्वशुरपदे स्त्रीजनकदंपत्योर्लक्षणा। एवमन्यत्रापि। घटा इत्यादौ न लक्षणा
घटत्वेन रूपेणानानाघटोपस्थितिसंभवात्।३

[redacted] वाच्यं। परंपरासंबंधेन तदन्वयात्। एवं पंचपूलीत्यादावपि। परंतु अहिनकुलमित्यादौ अहिर्नकुलश्च
बुध्यते प्रत्येकमेकत्वान्वयात्। समाहारसंज्ञा तु यत्रैकत्वं नपुंसकत्वं च द्वंद्वश्च प्राणित्वर्येत्यादिसूत्रेण कृता त
त्रैव। अत एवात्र एकवचनमसाधुत्वाञ्जः। कर्मधारयस्थले तु नीलोत्पलमित्यादौ अभेदसंबंधेन नीलपदार्थ उत्प
लपदार्थे प्रकारस्तत्र च न लक्षणा। अत एव निषादस्थपतिं याजयेदित्यत्र न तत्पुरुषः। लक्षणापत्तेः॥ किंतु क संबधिनि
र्मधारयः। लक्षणाभावात्। न च निषादस्य संकरजातिविशेषस्य वेदानधिकारात् याजनासंभव इति वाच्यं नि
षादस्य विद्याप्रयुक्तेस्तत एव कल्पनीयत्वात्। लाघवेन मुख्यार्थस्यान्वये तदनुपपत्त्या कल्पनायां फलमुख
गौरवतयाऽदोषत्वादिति। उपकुंभमित्यादावव्ययीभावे अर्द्धपिप्पलीत्यादौ तत्पुरुषे च परपदे तत्संबंधिनि लक्ष
[redacted]

॥५५॥ एतापूर्वपदार्थप्रधानतयाचान्वयबोधइति। इत्थंच समासेनक्वापिशक्तिः। पदशक्त्यैवनिर्वाहादिति। [redacted] आसत्तियोग्यते ति। आसत्तिज्ञानं

योग्यताज्ञानमाकांक्षाज्ञानंतात्पर्यज्ञानंच शाब्दबोधेकारणं। तत्रासत्तिपदार्थमाह। संनिधानं

त्विति। अन्वयप्रतियोगिपदयोरव्यवधानमासत्तिस्तज्ज्ञानंशाब्दबोधेकारणं। [redacted] कुवि ॥५५

ह्यव्यवहितेपित्र्यव्यवधानमसाच्छब्दबोधइतिकेचित् [redacted] गिरिर्भुक्तमग्निमानदेवदत्तेनेत्यादावव्यवधानेनो व

वस्थितस्त्वेत्र्यव्यवधानज्ञानस्यानपेक्षितत्वात्। यत्पदार्थस्ययत्पदार्थेनसहान्वयोपेक्षितस्तयोरव्यवधानेनोपस्थितिरासत्तिः कारणंतेन२

एतेनतावद्वर्णाभिव्यंग्यःपदार्थस्फोटोपिनिरस्तः। नचद्वर्ण

पास्थित्य१ नशाब्द२ ग्ग स्य२ संस्कारसहितचरमवर्णोपलंभेनतद्धंउकेनैवोपपत्तिरितिद्व

संभवात्तबोधः। यत्रतुश्लोकादौव्यवहितानामप्यव्यवधानेनोपस्थितिस्तत्रसत्तिप्रत्वादेवान्वयबोधः। इत्थंचासत्तेरुप त्रा

२ त्रमा स्थितिरूपत्वात्तज्ज्ञानस्यहेतुत्वात्सासूत्रि भ्रमात्शाब्द भावेपिनक्षतिः। ननुयत्रकुत्रकुंडलीवासस्वीदेवदत्त

इत्याद्युक्तंतत्रोत्तरपदस्मरणेनपूर्वपूर्वपदस्मर्णनाशादव्यवधानेनोत्तरपदस्मरणासंभवइतिचेन्न। प्रत्येकप

दानुभवजन्यसंस्कारैश्चरमतावद्विषयकस्मरणस्याव्यवधानेनोत्पत्तेः। नानासत्तिकैर्षैरेकप्रत्यक्षस्येवना

नासंस्कारैरेकस्मरणोत्पत्तेरपिसंभवात्तावत्पदसंस्कारसहितचरमवर्णासातस्योद्बोधकत्वात्। कथमत्तथा

रे नानावर्णैकपदस्मरणं। परंतुतावत्पदार्थानांस्मरणादेकदैवखलेकपोतन्यायात्तावत्पदार्थानांक्रियाकारकभावेनार्था

न्वयरूपःशाब्दबोधोभवतीतिकेचित्। परेतुयद्यदाकांक्षितंयोग्यंसन्निधानंप्रपद्यतेतेनतेनान्वितःस्वार्थःपदैरेवा

वगम्यते। तथाचखंडवाक्यार्थबोधानंतरंतत्थैवपदार्थस्मृत्यामहावाक्यार्थबोधइत्याहुः। इदंतुबोध्यं। यत्र

वृद्धायुवानःशिशवःकपोताःखलेयथामीयुगपत्पतंति। तथैवसर्वेयुगपत्पदार्थाःपरस्परेणान्वयिनोभवंति॥५२

॥५६॥ हारमित्युक्तं तत्र पिधेहीत्यादिपदस्य ज्ञानादेव बोधः । न तु पिधानादिरूपार्थज्ञानात् पदजन्यपदार्थोपस्थितेस्तत्त्वाद्
बोधहेतुत्वात् । किंच क्रियाकर्मपदानां तेनैव सह साकांक्षत्वात् तेन क्रियापदं विना कथं बोधः स्यात् । तथा पुष्पेभ्य इ
त्यादौ स्पृहयतीत्यादिपदाध्याहारं विना चतुर्थ्यनुपपत्तेः । पुष्पमिच्छतीत्यादौ चतुर्थ्यभावात् तस्मात्पदाध्याहार
आवश्यकः । योग्यतां निर्वक्ति । पदार्थ इत्यादिना । एकपदार्थेऽपरपदार्थसंबंधो योग्यतेत्यर्थः । तज्ज्ञानाभावाच्च व
ह्निना सिंचतीत्यादौ न शाब्दबोधः । नन्वेतस्या योग्यताया ज्ञानं शाब्दबोधात् प्राक् संभवति वाक्यार्थस्यापूर्वत्वात् इति सर्वत्र न४
चेन्न । तत्तत्पदार्थस्मरणे सति क्वचित्संशयरूपस्य क्वचिन्निश्चयरूपस्यापि योग्यताज्ञानस्य संभवात् । न वा सक्त । यो
ग्यताज्ञानं न शाब्दबोधे कारणं । वह्निना सिंचतीत्यादौ सेके वह्निकरणकत्वाभावरूपायाऽयोग्यतायाः निश्चयेन ॥५६॥
प्रतिबंधान्न शाब्दबोधः । तदत्तावतिश्चयस्य लौकिकसान्निकर्षाऽजन्यदोषविशेषाऽजन्यतद्धानमात्रे प्रतिबंधक

त्वाच्छाब्दं प्रत्यपि प्रतिबंधकत्वं सिद्धं । योग्यताज्ञानविलंबाच्च शाब्दबोधविलंबोऽप्रसिद्ध इत्याहुः ॥ ॥ आकांक्षां नि
र्वक्ति । तत्पदेनेत्यादि । येन पदेन विना यत्पदस्यान्वयाननुभावकत्वं तेन सह तस्याकांक्षेत्यर्थः । क्रियापदं विनान्वय कां
बोधं न जनयतीति तेन तस्याकांक्षा । वस्तुतस्तु क्रियाकारकपदानां सन्निधानमासत्त्या चरितार्थं । परं तु घटक
र्मताबोधं प्रति घटपदोत्तरं द्वितीयारूपाकांक्षाज्ञानं कारणं तेन घटः कर्मत्वमानयनं कृतिरित्यादौ न शाब्दबोधः
उ । अयमेति पुत्रो राज्ञः पुरुषोऽपसार्यतामित्यादौ पुत्रेण सह राजपदस्य तात्पर्यग्रहान्नैवान्वयबोधः पुरुषेण स
ह तात्पर्यग्रहाभावात् तेन तत्सहान्वयः । तात्पर्यं निर्वक्ति । वक्तुरिच्छेति । यदि तात्पर्यज्ञानं कारणं तस्यान्तदा सैं
धवमानयेत्यादौ क्वचिदश्वस्य क्वचिल्लवणस्य बोधो न स्यात् न च तात्पर्यग्राहकाणां प्रकरणादीनां शाब्दबोधे
कारणत्वमस्त्विति वाच्यं । तेषामननुगमात् । तात्पर्यज्ञानजनकत्वेन तेषामनुगमे तु तात्पर्यज्ञानमेवला
पुरुषेण सह तात्पर्यग्रहेतु तेन सहान्वयः स्यादेव । ३

॥५७॥ घवात्कारणमस्तु। इत्थंच वेदस्थलेपि तात्पर्यज्ञानार्थमीश्वरः कल्प्यते। नच तत्राध्यापकतात्पर्यज्ञानं कारणमिति
वाच्यं। सर्गाद्यावध्यापकाभावात् तन्न च प्रलय एव नास्ति कुतः सर्गादिति वाच्यं। प्रलयस्यागमप्रतिपाद्यत्वात्। इत्थंच शुक
वाक्येपीश्वरीयतात्पर्यज्ञानं कारणं। विसंवादिशुकवाक्येतु शिक्षयितुरेव तात्पर्यज्ञानं कारणं। अन्येतु। नानार्थादौ
क्वचिदेव तात्पर्यज्ञानं कारणं। तथाच शुकवाक्ये विनैव तात्पर्यज्ञानं शाब्दबोधः। वेदे त्वनादिमीमांसापरिशोधि
ततर्कैरर्थावधारणमित्याहुः। पूर्वमनुभवस्मरणभेदाद्बुद्धेर्द्वैविध्यमुक्तं। तत्रानुभवप्रकारा दर्शिताः। सुगमतया
स्मरणं न दर्शितं। तत्र हि पूर्वानुभवः कारणं। अत्र केचित्। अनुभवत्वेन न कारणत्वं किंतु ज्ञानत्वेन। अन्यथा
स्मरणोत्तरं स्मरणं न स्यात्। समानप्रकारकस्मरणेन पूर्वसंस्कारस्य विनष्टत्वात्। मन्मतेतु तेनैव स्मरणेन ॥५७॥
संस्कारांतरद्वारा स्मरणांतरं जन्यत इत्याहुः। तन्न। यत्र समूहालंबनोत्तरं घटपटादीनां क्रमेण स्मरणमजनिष्ट

सकलविषयकस्मरणं तु माभूत्। तत्र फलस्य संस्कारनाशकत्वाभावात्॥ कालस्य रोगस्य चरमफलस्य वा संस्कार
नाशकत्वं वाच्यं। तथाच न क्रमिकस्मरणानुपपत्तिः। इत्थं च न स्मरणोत्तरमस्मरणप्रसंगः। चरमफलस्य संस्का
रनाशकत्वात्। न च पुनःपुनः स्मरणाद्दृढतरसंस्कारानुपपत्तिः। अदृष्टोद्बोधकसमवधानस्यादार्थपदार्थत्वा
त्। नच विनिगमनाविरहादेव ज्ञानत्वेनापि जनकत्वं स्यादिति वाच्यं। विशेषधर्मेण व्यभिचारज्ञाने सामान्यध
र्मे सामान्यथासिद्धत्वात्। कथमन्यथा दंडस्य भ्रमिद्वारा द्रव्यत्वेन रूपेण न कारणत्वं। नचांतरालिकस्मरणांतं
संस्कारनाशकत्वसंशयात् व्यभिचारसंशय इति वाच्यं। अनंतसंस्कारतन्नाशकल्पनापत्त्या चरमस्मरणस्यै
व संस्कारनाशकत्वेन व्यभिचारसंशयाभावात्। इदानीं क्रमप्राप्तं मनो निरूपयितुमाह। साक्षात्कार
दि इति। एतेन मनसि प्रमाणं दर्शितं। तथाहि। सुखसाक्षात्कारः सकरणकः जन्यसाक्षात्कारत्वात्। चाक्षु

॥५८॥ वसाक्षात्कारत्वात्। इत्यनेन मनसः कारणत्वसिद्धेः। नचैवं दुःखादिसाक्षात्काराणामधिकारणांतराणि स्युरिति वा
च्यं लाघवादेकस्यैव तादृशस्य सकलसाक्षात्कारकारणतया सिद्धेः। एवं सुखादीनामसमवायिकारणसंयो
गाश्रयतया मनःसिद्धिर्बोद्धव्या। मनसोऽणुत्वे प्रमाणमाह। यौगपद्यादिति। ज्ञानानां चाक्षुषरासनादीनाम अ
यौगपद्यं एककालोत्पत्तिर्नास्तीत्यनुभवसिद्धं। तत्र नानेंद्रियाणां सत्यपि विषयसन्निधाने यत्संबंधादेकेंद्रिये
रिंद्रियै णाज्ञानमुत्पद्यते तदसंबंधाच्च [redacted] परेंद्रौ तं नोत्पाद्यते तन्मनस्तस्य विभुत्वे चासन्निधानं तस्य भवतीति विभु न
मनः। नचैतत्तदानीमदृष्टविशेषोद्बोधविलंबादेव तज्ज्ञानविलंब इति वाच्यं। तद्वासनाचक्षुरादीनामपि कल्प्य नो
प नोपपत्तेः। नच दीर्घशष्कुलीभक्षणादौ नानावधानभाजांच कथमेकदा नानेंद्रियज्ञानमिति वाच्यं। मनसोऽतिला ऊ॥५८॥
घवात्तत्क्षितिनानेंद्रियसंबंधान्नानाज्ञानोत्पत्त्या उत्पलशतपत्रभेदादाविव यौगपद्यप्रत्ययस्य भ्रांतत्वात्। नचम

नसः संकोचविकाशशालित्वाद् दुल्तयोरप्युपपत्तिरस्त्विति वाच्यं। नानावयवतन्नाशादिकल्पनागौरवात्लाघवान्निर
वयवस्यैवाणुरूपस्य मनसः कल्पनादिति संक्षेपः॥ ॥इति द्रव्यपदार्थव्याख्या समाप्ता॥ ०॥ द्रव्यं निरूप्य गुणान्नि
रूपयति। अथेत्यादिना। गुणत्वजातौ किं मानमिति चेत्। द्रव्यकर्मभिन्ने सामान्यवति या कारणता सा किंचि
द्धर्मावच्छेद्या। निरवच्छिन्नकारणताया असंभवात्। नहि रूपत्वादिकं सत्तावच्छेदिका न्यूनाधिकदेशवृत्तित्वा वानत्रा
त्। अतश्चतुर्विंशत्यनुगतं वाच्यं। तदेव गुणत्वमिति। द्रव्याश्रिता ज्ञेया यद्यपि द्रव्याश्रितत्वं न लक्षणं कर्मादावति
व्याप्तेः। तथापि द्रव्यत्वव्यापकतावच्छेदकसत्ताभिन्नजातिमत्वं तदर्थः। भवति हि गुणत्वं द्रव्यत्वव्यापकतावच्छे
दकं तद्वत्त्वं च गुणानामिति। द्रव्यत्वं कर्मत्वं वा न द्रव्यत्वव्यापकतावच्छेदकं। गगनादौ द्रव्यकर्मणोरभावात्। द्रव्या

त्वत्वं सामान्यत्वं वा न जातिरिति तद्व्युदासः ॥ निर्गुणाइति । यद्यपि निर्गुणत्वं कर्मादावपि तथापि सामान्यवत्त्वे कर्मान्य
त्वे च सति निर्गुणत्वं बोध्यं । जात्यादीनां न सामान्यवत्त्वं कर्मणो न कर्मत्वं द्रव्यस्य न निर्गुणत्वमिति न तत्रा
तिव्याप्तिः । निष्क्रियाइति । स्वरूपकथनं न तु लक्षणं । गगनादावतिव्याप्तेः । रूपमिति । वेगेनास्थितिस्थापना
यो दयुपलक्षणं । योगः मूर्तगुणाइति । अमूर्तेषु न वर्त्तंत इत्यर्थः । उभयेषामिति । मूर्तामूर्तगुणा इत्यर्थः । मूर्तवृत्तिर
त्ति अमूर्तवृत्तित्वं गुणत्वव्याप्यजातिमत्त्वं संख्यादिकमाद्य लक्षणसमन्वयः । अनेकाश्रिताइति संयोगवि
भागद्वित्वादीनि द्विवृत्तीनि त्रित्वचतुष्ट्वादिकं त्रिचतुरादिवृत्तीति बोध्यं । अतः शेषाइति । रूपरसगंध स्पर्श सं ॥५९॥
ख्या परिमाणैकपृथक्त्वपरत्वापरत्वबुद्धि सुखदुःखेच्छा द्वेषयत्नगुरुत्वद्रवत्वस्नेहसंस्कारादृष्टशब्दा इत्यर्थः

स्पर्शादीति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्ना इत्यर्थः । स्पर्शांताइति । रूपरसगंधस्पर्शा इत्यर्थः । द्रवः द्रवत्वं । वैशेषि
काइति । विशेषा एव वैशेषिकाः स्वार्थे ठक् । विशेषगुणा इत्यर्थः । संख्यादिरिति । संख्यापरिमाणपृथक्त्वसं
योगविभागपरत्वापरत्वानीत्यर्थः । द्वींद्रियेति । चक्षुषा त्वचापि ग्रहणयोग्यत्वात् । वाह्येति । रूपादीनां चक्षुरा
दिग्राह्यत्वात् । विभूनामिति । बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मभावनाशब्दा इत्यर्थः । अकारणेति । कारणगु
णेन कार्ये गुणा उत्पद्यंते तेन कारणगुणपूर्वका रूपादयो वक्ष्यंते । बुध्यादयस्तु न तादृशाः । आत्मादेः
कारणाभावात् । पाकजरूपादीनां कारणगुणपूर्वकत्वाभावात् । अपाकजा इत्युक्तं । तथा विधं अपाकजं का
ए रणगुणोद्भवाइति । तथा एकत्वमपि बोध्यं । कर्मजत्वं यद्यपि वैसाधर्म्यं घटादावतिव्याप्तेः संयोगजसंयोगेऽव्याप्ते

कर्मजाइति २

॥६०॥

श्व। तथापि कर्मडमनाद्वृत्तिगुणत्वव्याप्यजातिमत्वं बोध्यं। एवमन्यत्रापि क्वचिदूह्यं। भवेदसमवायित्वमिति। घटादिरू
परसगंधस्पर्शाः कपालादिरूपरसगंधस्पर्शेभ्यो भवंति। एवं कपालादिपरिमाणादीनां घटादिपरिमाणे घ ए
समवायिकारणत्वं। एवं शब्दस्यापि द्वितीयशब्दं प्रति एवं स्थितिस्थापकैकत्वयोरपि ज्ञेयं। निमित्तत्वमिति।
बुध्यादीनामिच्छादि निमित्तत्वादिति भावः। द्विधैवेति। असमवायिकारणत्वं निमित्तकारणत्वं च। तथा
हि। उष्णस्पर्श उष्णस्पर्शस्यासमवायी। पाकजे निमित्तं। गुरुत्वं गुरुत्वपतनयोरसमवायि। अभिघाते निमि
त्तं। वेगो वेगस्पंदयोरसमवायि। अभिघाते निमित्तं। द्रवत्वं द्रवत्वस्पंदयोरसमवायि। संग्रहे निमित्तं।
। भेरीदंडसंयोगः शब्दे निमित्तं। भेर्याकाशसंयोगो असमवायी। अभिघाते निमित्तं। वंशदलद्वि ॥६०॥
द्वय

भागः शब्दे निमित्तं। वंशदलाकाशविभागो असमवायी। प्रादेशिकः। अव्याप्यवृत्तिः। चक्षुरिति। रूपत्वजातिस्तु प्रत्यक्ष
त्व सिद्धा। रूपं शब्दं लोके विनापि प्रतीतिर्नास्तीति चेन्न। भास्वररूपं शब्दप्रयोगस्तथापि नीलपीतादिष्वनुगतजातिविशेषोनुभव त्व
त्व सिद्ध एव। रूपशब्दाप्रयोगेपि नीलो वर्णः पीतो वर्ण इति वर्णशब्देन तद्वत्वनी प्रतीतिरस्त्येव। एवं नीलत्वादिकमपि
प्रत्यक्षसिद्धं। न चैकैक एव नीलरूपादिव्यक्तय एकव्यक्तिवृत्तित्वान्नीलत्वादिकं न जातिरिति वाच्यं। नीलो न
ष्टः रक्त उत्पन्न इत्यादि प्रतीतेर्नीलादेरुत्पादविनाशशालित्वपातानात्वात्तथा एकनीलनाशे जगदनीलमा
पद्येत। न च नीलसमवायस्य रक्तसमवाययोरेव विनाशोत्पादविषयकोसौ प्रत्यय इति वाच्यं। प्रतीत्या समवायानु
ना त्पत्तेरेव तत्। न च स एवायं नील इति प्रत्यक्षात् लाघवाच्चैक्यमिति वाच्यं पूर्वदृष्टस्य तज्जातीयत्वविषयत्वात्। सैवे
यं गुर्जरीतिवत्। लाघवं तु प्रत्यक्षबाधितं। अन्यथा घटादीनामप्यैक्यप्रसंगात्। उत्पादविनाशशब्दैः समवा

॥६१॥ यालंबनत्वापत्तिरिति । एतेन रसादिकं व्याख्यातं । चक्षुर्ग्राह्यमिति । चक्षुर्ग्राह्यविशेषगुण इत्यर्थः । एवमग्रेपि द
व्यादेरिति । रूपत्वं तत्कं रूपलब्धिकारणं । इदमेव विवृणोति । चक्षुषइति । द्रव्यगुणकर्मसामान्यानां चाक्षुषप्रत्य
क्षे प्रति उद्भूतरूपं कारणं । तद्रूपं शुक्लपीतरक्तनीलकृष्णकर्बुरादिभेदादनेकप्रकारकं भवति । ननु कर्बुरं कथ
मतिरिक्तरूपं । इत्थं नीलपीताद्यारब्धो अवयवी न तावन्नीरूपः प्रत्यक्षत्वप्रसंगात् । नापि व्याप्यवृत्तिनीलादि
रूपमुत्पद्यते पीतावच्छेदेनापि नीलोपलब्धिप्रसंगात् । नाप्यव्याप्यवृत्ति नीलादिकमुत्पद्यते । व्याप्यवृत्तिजातीयगुण
नामव्याप्यवृत्तित्वविरोधात् । तस्मान्नानाजातीयरूपैरवयवैर्विजातीयं चित्रं रूपमारभ्यते । अत एव एकं
रूप चित्रमिति रूपन्तु तत्र नानारूपकल्पने [redacted] गौरवात् । इत्थं च नीलादीनां पीताद्यारंभे प्रतिबंधकत्वकल्पनादवय ॥६१॥
विनि न पीताद्युत्पत्तिः । एतेन स्पर्शोपि व्याख्यातः । रसादिकमपि नाव्याप्यवृत्तिः किंतु नानाजातीयरसवद

लोहितो यस्तु वर्णेन मुखे पुच्छे च पांडुरः ॥ श्वेतः खुरविषाणाभ्यां स नीलो वृष उच्यते ॥१॥

अवयवीनीरसत्वेपिइतरनावात्२

वयवैरारब्धे अवयविनि रसाभावेपि न क्षतिः । तत्र रसनया अवयवरस एव गृह्यते । रसनेंद्रियादीनां द्रव्यग्रहे साम
र्थ्याभावात् । [redacted] । जलादीति । जलपरमाणौ शुक्लरूपं नित्यं पृथिवीपरमाणुरूपं तु नानित्यं । तत्र पाकेन रूपांतरोत्पत्तेः । न
तेजःपरमाणौ ५
हि घटस्य पाकानंतरं तदवयवोपलभ्यते । नहि रक्तकपालस्य कपालिका नीलावयवा भवति । एवं क्रमेण परमाणा अपक्व उर्द
वपि पाक [redacted] सिद्धेः । अन्यत् । जलतेजः परमाणुरूपभिन्नरूपं सहेतुकं जन्यं । रसं निरूपयति । रसास्त्विति । सहका
रीति । रासनज्ञाने रसः कारणमित्यर्थः । पूर्ववदिति । जलपरमाणोरसो नित्यः । अन्यः सर्वोपि रसो अनित्य इत्य

॥६२॥ थः। गंधं निरूपयति। घ्राणग्राह्य इति। उपकारक इति। घ्राणजन्यज्ञाने कारणमित्यर्थः सर्वोपि गंधो अनित्य ए
व। स्पर्शं निरूपयति। स्पर्श इति। उपकारक इति। स्पार्शनप्रत्यक्षे स्पर्शः कारणमित्यर्थः। अनुष्णाशीतेति। पृथिवीवा
य्वोश्च स्पर्शो अनुष्णाशीतः। जलस्य शीतः तेजस उष्णः कठिनसुकुमारस्पर्शौ पृथिव्या एवेत्यर्थः। कठिनत्वादि
कं तु न संयोगनिष्ठो जातिविशेषः। चक्षुर्ग्राह्यतापत्तेः। पूर्ववदिति। जलतेजोवायुपरमाणुस्पर्शो नित्याः अ
न्ये स्पर्शास्त्वनित्या इत्यर्थः। एतेषां रूपरसगंधस्पर्शानां। नान्यत्रेति। पृथिव्यां हि रूपरसगंधस्पर्शपरावृत्तिः
पावकसंयोगादुपलभ्यते। न हि शतधापि ध्मायमाने जले रूपादिकं परावर्तते। नीरसौरस्तम्भो लघ्य चान्वयव्यतिरे
काभ्यामुपाधेरेवेति निश्चीयते। पवनपृथिव्योः शीतस्पर्शादिवत्। तत्रापि पृथिवीष्वपि मध्ये परमाणोरेव रूपा
दीनां पाक इति वैशेषिका वदंति। तेषामयमाशयः। अवयविनि अवष्टब्धेष्ववयवेषु पाको न संभवति ॥६२॥

वि परं तु वह्निसंयोगेनावयविषु नष्टेषु स्वतंत्रेषु परमाणुषु पाकः पुनश्च पक्वपरमाणुसंयोगाद्द्व्यणुकादि
क्रमेण पुनर्महावयविपर्यंतमुत्पत्तिः। तेजसामतिशयितवेगवशात् पूर्वव्यूहनाशोत्पत्तिव्यूहांतरो
त्पत्तिश्चेति। अथ द्व्यणुकादिविनाशमारभ्य कतिभिः क्षणैः पुनरुत्पन्नरूपादिमद्भवतीति शिष्य
बुद्धिवैशद्याय प्रक्रिया। तत्र विभागजविभागानंगीकारेण वक्ष्यते। तदंगीकारे विभागः किं
चित्सापेक्षो विभागं जनयेत् निरपेक्षस्य तत्त्वे कर्मत्वं [redacted]। तत्र यदि द्रव्यारंभकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागजविभागः स्यात् त
दा दशक्षणा। अथ द्रव्यनाशविशिष्टकालमवयवं वापेक्ष्य तदा एकादशक्षणा। तथाहि वह्नि ते

॥६१॥ संयोगात्परमाणौ कर्म ततः परमाण्वंतरेण विभागः [redacted] ततः आरंभकसंयोगनाशस्ततो द्व्यणुकनाशस्ततः
परमाणौ श्यामादिनाशस्ततो रक्ताद्युत्पत्तिस्ततो द्व्यारंभानुगुणा क्रिया ततो विभागः पूर्वसंयोगनाशस्तत स्तत
क आरंभकसंयोगस्ततो द्व्यणुकाख्यस्योत्पत्तिस्ततो रूपाद्युत्पत्तिः। ननु श्यामादिनाशक्षणे रक्तोत्पत्तिक्षणे वा
परमाणौ द्व्यारंभानुगुणा क्रियास्त्विति चेन्न। अग्निसंयुक्तपरमाणोर्यत्कर्म तद्धि नाशमंतरेण गुणोत्पत्ति
मंतरेण च तत्र परमाणौ क्रियांतराभावात्कर्मवति कर्मांतरानुत्पत्तेर्निर्गुणद्रव्ये द्व्यारंभानुगुणक्रियानुत्पत्तेश्च। रंना
तथापि परमाणौ श्यामादिति वृत्तिसमकाले रक्ताद्युत्पत्तिः स्यादिति चेन्न। पूर्वरूपादिध्वंसस्यापि ॥६२॥
रूपांतरहेतुत्वात्। अथ दशक्षणा॥ सा चारंभकसंयोगविनाशविशिष्टं कालमपेक्ष्य विभागेन विभागज

ननेसात्तिस्यात्। तथाहि। वह्निसंयोगाद्व्यणुकारंभके परमाणौ कर्म। ततो विभागः। तत आरंभसंयोगना क
शस्ततो द्व्यणुकनाशो विभागजविभागो। तत श्यामनाशः पूर्वसंयोगनाशो। ततो रक्तोत्पत्त्युत्तरसंयोगो।
ततो वह्निनोदनजन्यपरमाणुकर्मणो नाशः। ततो द्व्यणुवदात्मसंयोगाद्द्व्यारंभानुगुणा क्रिया ततो वि
क भागस्ततश्च पूर्वसंयोगनाशस्तत आरंभसंयोगस्ततो द्व्यणुकोत्पत्तिरथ रक्तोत्पत्तिः। अथैकादशक्ष
णा। वह्निसंयोगात्परमाणौ कर्म ततो विभागस्ततो द्व्यारंभकसंयोगनाशस्ततो द्व्यणुकनाशस्ततो द्व्यणुक
नाशविशिष्टं कालमपेक्ष्य विभागज विभागस्ततः पूर्वसंयोगनाशस्ततः उत्तरसंयोगस्ततः परमाणुदेश
व कर्मनाशस्ततो द्व्यणुवदात्मसंयोगाद्द्व्यारंभानुगुणा क्रिया। ततो विभागनाशस्ततो द्व्यारंभकसंयोग

स्ततः पूर्वसंयोग१

म१

॥६४॥ स्ततोद्व्यणुकं । ततोरक्तादि । मध्येश्यामत्वदेकस्मादग्निसंयोगान्नरूपनाशोत्पादौ । तावत्कालमेकस्याग्नेरस्थि
रत्वात् । किंच यद्विनाशकाएवोत्पादकास्तदा नष्टे रूपाद्यावग्निनाशे नीरूपश्चिरं परमाणुः स्यात् । उत्पादकश्चे
न्नाशकस्तदा रक्तोत्पत्तौ तदग्निनाशे रक्तस्यारक्तानस्यात् । परमाण्वंतरे कर्मचिंतनात्पंचमादिक्षणेपि गु
णोत्पत्तिः । तथाहि । एकत्र परमाणौ कर्म ततो विभागस्ततआरंभकसंयोगनाशपरमाण्वंतरकर्मणी । त क
तोद्व्यणुकनाशपरमाण्वंतरकर्मजन्यविभागइत्येकः कालः । ततः श्यामादिनाशः विभागाच्च पूर्वसंयोग
नाशइत्येकः कालः । ततोरक्तोत्पत्तिर्द्व्यारंभकसंयोगइत्येकः कालः । अथद्व्यणुकोत्पत्तिरथरक्तोत्पत्तिरिति ॥६४॥
पंचक्षणा । द्व्यणुनाशसमकाले परमाण्वंतरकर्मचिंतनात् षष्ठे गुणोत्पत्तिः । तथाहि । परमाणौ कर्म ततः परमा

ण्वंतरविभागस्ततआरंभकसंयोगनाशस्ततोद्व्यणुकनाश परमाण्वंतरकर्मणी । अथ श्यामनाशः परमाण्वं
तरकर्मजविभागश्च ततोरक्तोत्पत्तिः परमाण्वंतरे पूर्वसंयोगविभागश्च ततः परमाण्वंतरे संयोगस्ततोद्व्यण
कोत्पत्तिरथरक्तोत्पत्तिरिति । श्यामनाशक्षणे परमाण्वंतरे कर्मचिंतनात् सप्तक्षणा । तथाहि परमा
क. णौ कर्म ततः परमाण्वंतरविभागस्ततआरंभसंयोगनाशस्ततोद्व्यणुकनाशस्ततः श्यामादिनाश
परमाण्वंतरकर्मणी । ततोरक्तोत्पत्तिः परमाण्वंतरकर्मजविभागश्च । ततः परमाण्वंतरपूर्वसंयोग
नाशस्ततः आरंभकसंयोगस्ततोद्व्यणुकोत्पत्तिस्ततोरक्तोत्पत्तिरिति । एवं रक्तोत्पत्तिसमकालं
परमाण्वंतरे कर्मचिंतनादष्टक्षणा इति । नैयायिकानामिति । नैयायिकानां मते द्व्यणुकादावव

॥६५॥ विन्यापिपाको भवति । तेषामयमाशयः । अवयविनां सच्छिद्रत्वाद्वह्नेः सूक्ष्मावयवैरंतः प्रविष्टैरवयवेष्ववस्थितेष्वे
वापि पाको न विरुध्यते । अनंतावयवतन्नाशकल्पने गौरवं । स एवायं घट इत्यादि प्रत्यभिज्ञा । यत्र तु न प्र पि संगच्छते
त्यभिज्ञा तत्रावयविनाशोपि स्वीक्रियत इति । संख्यां निरूपयति गणनेति । गणनाव्यवहारासाधा
रणं कारणं संख्येत्यर्थः । नित्येष्विति । नित्येषु परमाण्वादिषु एकत्वं नित्यं । अनित्ये घटादौ अनित्यमेक
त्वमित्यर्थः । द्वित्वादयो व्यासज्यवृत्तिसंख्याः अपेक्षाबुद्धिजन्याः इत्यर्थः । विद्यमानैर्यावत्तद्द्रव्यवृत्ति
ः परार्द्धसंख्या सा चेश्वरस्य योगिनो वाऽपेक्षाबुद्धिर्जन्यते । अनेकेति । यद्यपि द्वित्वादिसमवायं प्रत्ये ॥६५॥
कं घटादावपि वर्त्तते तथापि एको द्वाविति प्रत्ययाभावात् एकौ न द्वाविति प्रत्ययसद्भावाच्च द्वित्वादीनां पर्याप्ति

लक्षणः कश्चन संबंधो अनेकाश्रयो अभ्युपेयते । अपेक्षाबुद्धिनाशाच्चेति । प्रथममपेक्षाबुद्धिस्ततो द्वित्वोत्प
त्तिस्ततो विशेषणज्ञानं द्वित्वद्वित्वत्वनिर्विकल्पकात्मकं । ततो द्वित्वत्वविशिष्टप्रत्यक्षं अपेक्षाबुद्धिनाशश्च ततो
द्वित्वनाश इति । यद्यपि ज्ञानानां तृतीयक्षणमात्रस्थायित्वं योग्यविभुविशेषगुणानां स्वोत्तरवृत्तिगुणनाश्यत्वात्त
त्तथापि अपेक्षाबुद्धेस्त्रिक्षणावस्थायित्वं कल्प्यते । अन्यथा निर्विकल्पककाले अपेक्षाबुद्धिनाशादनंत
रं द्वित्वस्यैव नाशः स्यात् न तु द्वित्वप्रत्यक्षं तदानीं विषयाभावात् । विद्यमानस्यैव चक्षुरादिना ज्ञानजननोपगमा
त् तस्माद्द्वित्वप्रत्यक्षादिकमपेक्षाबुद्धेर्नाशकं कल्प्यते । नन्वपेक्षाबुद्धिनाशात्कथं तन्नाश इति वाच्यं । कालां
तरे द्वित्वप्रत्यक्षाभावादपेक्षाबुद्धिस्तदुत्पादिका । तन्नाशात्तन्नाशक इति कल्पनात् । अतस्तत्तु रूपीयापेक्षा

॥६६॥

बुद्धिजन्यद्वित्वादिकं तेनैव गृह्यत इति कल्प्यते । न चापेक्षाबुद्धेर्द्वित्वप्रत्यक्षकारणत्वमस्त्विति वाच्यं । लाघवेन
द्वित्वप्रतिकारणत्वस्यैवोचितत्वात् । अतींद्रियेद्व्यणुकादौ अपेक्षाबुद्धिर्योगिनां सर्गादिकालीनपरमाण्वादौ
ईश्वरीयापेक्षाबुद्धिर्ब्रह्मांडांतरवर्त्तियोगिनामपेक्षाबुद्धिर्वा द्वित्वादिकारणमिति । अपेक्षाबुद्धिः केय
तत्राह । अनेकेति । अयमेकः अयमेक इत्याकारिकेत्यर्थः । इदं तु बोध्यं । यत्रानियतैकत्वज्ञानं तत्र द्वित्वा
दिभिन्ना बहुत्वसंख्योत्पद्यते । यथा सेनावनादाविति कंदलीकारः । आचार्यास्तु त्रित्वादिकमेव बहुत्वमन्यं ते ॥६६॥
। तथा च त्रित्वादिव्यापिका बहुत्वजातिः सेनादौ चोत्पन्नेपि त्रित्वादौ त्रित्वत्वाद्यग्रहो दोषात् । इतो बहुत्व
रेयमिति प्रतीतिरुत्पद्यते । बहुत्वस्य संख्यांतरत्वे तु तारतम्याभावादित्यवधेयं । परिमाणं निरूपयति । परिमि

इलंवर

णमिति । परिमितिव्यवहारासाधारणं कारणं परिमाणमित्यर्थः । तच्चतुर्विधं । अणु महद्दीर्घं ह्रस्वं च
। तत्परिमाणं । नित्यमित्यत्र परिमाणमित्यनुषज्यते । जायत इत्यत्रापि परिमाणमित्यनुवर्त्तते । अनित्य
मिति पूर्वेणान्वितं । तथा चानित्यं परिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः । तत्र संख्या
जन्यमुदाहरति । द्व्यणुकादाविति । द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुपरिमाणं द्व्यणुक
परिमाणं वा न कारणं । परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाणजनकत्वात् । द्व्यणुकस्याणु
एव परिमाणं तु परमाणुत्वापेक्षया नोत्कृष्टं । त्रसरेणुपरिमाणं तु न सजातीयं अतः परमाणौ द्वित्व
संख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रित्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः ॥

६९॥

परिमाणजन्यमुदाहरति। परिमाणं घटादाविति। घटादिपरिमाणं कपालादिपरिमाणजन्यं। प्रचयमुदाह जन्य
रति प्रचयं निर्वक्ति। प्रचय इति। तन्नाशं निरूपयति। नाश इति। अवयवपरिमाणस्य। पृथक्त्वं निरूपयति।
संख्यावदिति। पृथक्प्रत्ययसाधारणं कारणं पृथक्त्वं। नित्यतादिकं संख्यावत्। यथा नित्येष्वेकत्वं नित्य
पु मनित्येष्वनित्यमेकत्वं। आश्रयद्वितीयक्षणे चोत्पद्यते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि
द्वित्वादिवद्द्विपृथक्त्वादिकमपीत्यर्थः। नन्वयमस्मात्पृथगित्यादावन्योन्याभावो भासते तत्कथं प्
थक्त्वं गुणान्तरं स्वीक्रियते न च पृथक्त्वमेवास्तु तत्वन्योन्याभाव इति वाच्यं रूपं न घट इति प्रतीत ॥६९॥
नापत्तेः नहि रूपे घटावधिकं पृथक्त्वं गुणान्तरमस्ति न वा घटे रूपावधिकं पृथक्त्वमस्ति येन तत्परंपरा

णमितिपरिमितिव्यवहारासाधारणकारणं। परिमाणमित्यर्थः। तच्च चतुर्विधं अणु महद्दीर्घं ह्रस्वं च तत्प
रिमाणं नित्यमनित्यं च परिमाणमित्यनुषज्यते। अथ तद्व्यत्रापि परिमाणमित्यनुवृत्तौ अनित्यमि
ति पूर्वेणान्वितं तथा चानित्यपरिमाणं संख्याजन्यं परिमाणजन्यं प्रचयजन्यं चेत्यर्थः। तत्र संख्याजन्य
मुदाहरति द्व्यणुकादाविति। द्व्यणुकस्य त्रसरेणोश्च परिमाणं प्रति परमाणुद्व्यणुकपरिमाणं वा न कारणं परिमाणं
परिमाणस्य स्वसमानजातीयोत्कृष्टपरिमाण[redacted]जनकत्वात् द्व्यणुकस्याणुपरिमाणं परमाणुत्वापेक्षा ण
यातोत्कृष्टं त्रसरेणुपरिमाणं तु न सजातीयमतः परमाणौ द्वित्वसंख्या द्व्यणुकपरिमाणस्य द्व्यणुके त्रि
त्वसंख्या च त्रसरेणुपरिमाणस्यासमवायिकारणमित्यर्थः। परिमाणजन्यमुदाहरति परिमाणं घट

॥ह्रौ॥

तंनाशंनिरूपयति॥

दाविति॥ परिमाणंजंकपालादिपरिमाणजन्यंप्रचयजन्यम्महत्त्वं प्रचयंनिर्वक्ति प्रचयइति॥ नाशइति॥ अर्थात्
परिमाणस्य ॥ पृथक्त्वं निरूपयति॥ संख्यावदिति॥ पृथक्त्व प्रत्यया साधारणं कारणं पृथक्त्वं॥ अनित्यत्वा
दिकंसंख्यावत् । यथाहि नित्येषु एकत्वंनित्यं अनित्येषु अनित्यं आश्रया॥ द्वितीयक्षणोचोत्पद्य मेकत्वं॥
ते आश्रयनाशान्नश्यति तथा एकपृथक्त्वमपि द्वित्वादिवद्द्विपृथक्त्वादिकमपीत्यर्थः॥ नन्वस्मात्पृथगि
त्यादावन्योन्याभावो भासते तत्कथं पृथक्त्वं गुणांतरं स्वीक्रियते॥ नच पृथक्त्वमेवास्तु नत्वन्योन्या
भाव इति वाच्यं॥ रूपंनघटइति प्रतीत्यनापत्तेः॥ नहि रूपे घटावधिकं पृथक्त्वं गुणांतरमस्ति नवाघटे
घु॥ प्राप्तस्यकंस्कं ... पृथक्त्वमस्ति येन परंपरा ... ॥ ॥ ॥ ॥ ॥०॥

व

॥हि०॥